RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23
Posting Date.: 4-5, 19-20 of Every Month

॥ ओ३म् ॥
आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रसङ्कटे।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धव:॥

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्॥
प्राप्येह लोके सत्कारं सुगतिं प्रतिपद्यते॥ (महर्षि चाणक्य)

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवाद:

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेवसाइट: www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
माता शत्रु पिता वैरी येन बालो न पाठित:।
न शोभते सभा मध्ये हंसमध्ये बको यथा ॥

कान्तावियोग: स्वजनापमान: ऋणस्य शेष: कुनृपस्य सेवा।
दरिद्रभावो विषमा सभा च विनाग्निनैते प्रदहन्ति कायम्॥
(महर्षि चाणक्य)

卐 वर्षम्-१३ 卐 अंक:-०६ (२९४) नवदेहली 卐 १६ सितम्बरमास: २०२३त: ३० सितम्बरमास: २०२३ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## संस्कृतभाषाया: सर्वोच्चराष्ट्रियपुरस्कारस्य स्थगनं दुर्भाग्यपूर्णम्

नवदेहली (वेदप्रकाशशर्मा)। केन्द्रीयभाजपासर्वकारेण राष्ट्रीयशिक्षानीति:-2020 भाषाया: वैशिष्ट्यं तथा च भारतीयसंस्कृतिपरम्परादिसंवर्धनदृशा अवलोक्यते। परन्तु संस्कृतभाषाया: विशिष्टविद्वद्भ्य: 'राष्ट्रपति पुरस्कार' नाम्ना प्रतिवर्षं य: पुरस्कार: दीयते स्म,। खलु पुरस्कार: विगतवर्षचतुष्टयेभ्य: स्थगित: वर्तते। केन्द्रसर्वकारस्य व्यवहारेनानेन संस्कृतसमाज: व्यथित: सन् नैराश्यतामनुभवति। अत्रेदमप्युल्लेखनीयमस्ति यदयं पुरस्कार: संस्कृतभाषाया: विद्वद्भ्य: स्वतन्त्रताप्राप्त्यनन्तरं १९५८ वर्षाद् दीयमान: वर्तते। पुरस्कारस्यास्य घोषणा प्रायश: स्वतन्त्रताया: दिवसे क्रियते।संस्कृतविदुषां कथनमिदमस्ति यत् सर्वकारस्य विषयेऽस्मिन् उदासीनता २०१६ वर्षादेव जाता। क्रमेऽस्मिन् २०१६-१७-१८ घोषितपुरस्कारोऽयं ४ अप्रैल २०१९ तमे वर्षे तत्कालीन-उपराष्ट्रपतिना वेंकैयानायडूमहोदयेन नवदेहलीस्थ-अशोकानामधेयेविश्रामालये(होटल)प्रदत्त:। विषयैस्मिन् केषांचित् विदुषामापत्तिरासीत।सर्वकार: विषयैस्मिन् संज्ञानं गृहीत्वा ५ अप्रैल २०१९ तमे वर्षे राष्ट्रपतिभवने पुरस्कृतविदुषां स्वागतमकरोत्। अनन्तरं सर्वकारेण पुरस्कारोऽयं २०२०-२१-२२-२३वर्षाद् पूर्णत: स्थगित: वर्तते। संस्कृतविदुषां विषयेऽस्मिन् कथनमिदमस्ति यदयं काल: भारतीयसंस्कृतिसभ्यताभाषाप्रचारादिदृशा स्वर्णकाल: मन्यते।तथापि संस्कृतविदुषां कृते सर्वोच्चराष्ट्रियपुरस्कारस्य राष्ट्रपतिपुरस्कारस्य स्थगनं अत्यन्तं दुखकरमस्ति। विदुषामिदमपि वक्तव्यमस्ति यत् संस्कृतभाषाया: अन्यराजकीयपुरस्कारा: पूर्ववदेव प्रदीयन्ते। संस्कृतभाषापुरस्कारं प्रति सर्वकारस्य व्यवहार: दुर्भाग्यपूर्ण: वर्तते।

## भारतरत्न-डॉ. पाण्डुरङ्ग-वामन-काणेसंस्कृताऽध्ययनकेन्द्रे पञ्चदिवसीय: अध्यापक-प्रशिक्षणवर्ग: सम्पन्न:

कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालय:, रामटेकम्, भारतरत्न-डॉ. पाण्डुरङ्ग-वामन-काणेसंस्कृत-अध्ययन-केन्द्रम्, एवं महाराष्ट्र-राज्य-अध्यापक-विकास-संस्था (डैथ्व।) इत्यस्या: संयोगेन अगस्तमासस्य २७ दिनाङ्कत:३१ अगस्तपर्यन्तम् (२०२३) पञ्चदिवसीय: अध्यापक-विकास-प्रशिक्षणकार्यक्रम: "समग्रस्वास्थ्याय योग:" (ल्वहं वित भ्वसपेजपब भ्मंसजी)इति विषये आयोजित: आसीत। कार्यक्रमस्याऽस्य उद्घाटनसमारोह: महाराष्ट्रस्य पालकमन्त्रिणां माननीयानां श्रीमताम्



उदयजी-सामन्तवर्याणांहस्ताभ्यां तथा च कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य कुलगुरूणां मान्यानां हरेरामत्रिपाठीमहोदयानां साध्यक्ष्येण सम्पन्नोऽभवत्।

मान्या: कुलगुरव: प्रा. हरेराम-त्रिपाठीवर्या: घ्भारतीय-ज्ञानपरम्परया व्यक्तित्वनिर्माणं राष्ट्रनिर्माणं च कर्तुं शक्यते ६ इत्यवोचत। योगस्य महत्वं प्रतिपादयन्त: आचार्या: प्राध्यापकान् उद्बोधितवन्त: 'स्वास्थ्यरक्षणाय योग: नितान्त आवश्यक:, अत: शारीरिक-मानसिकस्वास्थ्यरक्षणाय सर्वैर्यत्नैर्योग: आचरणीय:। अधुना रत्नगिरि-उपकेन्द्रं सर्वसुविधाभिर्वर्धमानमस्ति। एवमेव उत्तरोत्तरं वृद्धिं सम्पाद्य अन्ताराष्ट्रीयं स्थानं प्राप्स्यतीति मे दृढविश्वासोऽस्तीति। अस्मिन् प्रसङ्गे श्रीमन्त:उदयजी-सामन्तमहोदया: उद्घाटनकार्यक्रमस्य प्रमुखाऽतिथिपदं भूषितवन्त:। श्रीमत्-उदयजी-सामन्त-महोदयै: रत्नगिरि-उपकेन्द्राय ५ एकर-परिमितं भूभागं दातुम् उद्घोषितम्। उपस्थितान् उद्बोधयन्त: श्रीमन्त: उदयजी-सामन्त-महोदया: उक्तवन्त: यत् ख्र शरीरस्य स्वास्थ्यं रक्षितुं योग: नितान्तावश्यक: अस्ति, योगस्य महत्वं विज्ञाय तं योगम् आन्दोलनात्मकतया परिपालयितुं समाजे जनजागृति: आवश्यकी। महाराष्ट्रस्य भाविनेतृत्वं कुर्वाणा: नवयुवका: शारीरिक-मानसिक-दृष्ट्या सामर्थ्यवन्त: भवेयु:, रोगमुक्ता: तिष्ठेयु:, तत् न शक्यं योगं विना। तस्मात् योगविषये जनजागृति: कुर्वन्त: वयं सर्वेऽपि नूनं यश: सम्पादयितुं पारयाम:। महाराष्ट्र-राज्य-अध्यापक-विकास-संस्थाया: केन्द्र-समन्वयिका सुजाता वरदराजन्, तथा रत्नगिरी-उपकेन्द्रस्य सञ्चालका: दिनकरख्रमराठेवर्या: चउपस्थिता: आसन्। कार्यक्रमस्य प्रास्ताविकं दिनकर-मराठेवर्य: कृतवान्, ध न्यतावचांसिमहाराष्ट्र-राज्य-अध्यापक-विकास-संस्थाया: श्रीमती सुजाता वरदराजन्-वर्या व्याहारीत्। पञ्चदिवसीय:अध्यापक-विकास-प्रशिक्षणकार्यक्रमे महाराष्ट्रस्य विभिन्नभागेभ्यश्चत्वारिंशत् प्राध्यापका: समभागिन: आसन्।

## संस्कृतमहोत्सवस्य समापनकार्यक्रम:

डॉ.अमितभार्गव:-संस्कृतमातु: सेवायै शास्त्ररक्षणाय च कृतसंकल्पेन महाराष्ट्रराज्यस्य नागपुरनगरस्थितेन कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयेन श्रावणमासं संस्कृतमासमङ्गीकृत्य नैके कार्यक्रमा:



न्ययोजिषत। संस्कृतमहोत्सवेस्मिन् नैका स्पध ा:, तद्ययथा अन्याक्षरीस्पर्धा, गणितक्रीडास्पध ा, शब्दरूपधातुरूपस्पर्धाद्य:, नैका: व्याख्यानमाला:, वाक्यार्थगोष्ठ्यश्च संजाता:। एतेषां कार्यक्रमाणां विस्तरेण विवरणं विश्वविद्यालयस्य सामाजिकमाध्यमेषु स्पष्टतया अधिगन्तुं शक्यते। एतादृशस्य कार्यक्रमस्य अद्य १३-०९-२०२३ दिनाङ्के समारोपकार्यक्रम: अजनि। एतस्मिन् कार्यक्रमे अस्य विश्वविद्यालयस्य सम्मान्या: कुलपतय: प्रो हरेरामत्रिपाठी महाभागा: आसन। संस्कृतमहोत्सवेस्मिन्सम्मान्या: कुलपतय:

शेषभाग:द्वितीयेपुटे

## पतंजलि-विश्वविद्यालये 'राष्ट्रिय-हिन्दी-दिवस:' आयोजित:

हरिद्वारम्, 14 सितम्बरमासीय:। राष्ट्रिय हिन्दी दिवसं समुपलक्ष्य पतंजलि विश्वविद्यालये संकाय सदस्यै: विद्यार्थिभिश्च विभिन्न कार्यक्रमा: आयोजिता:। पतंजलि विश्वविद्यालय: शिक्षण-प्रशिक्षण-अनुसंधान सहिते कार्यस्थले मातृभाषा हिन्दीं प्रयोक्तुं प्रमुखतया बलं ददाति। कार्यक्रमे मुख्य:अतिथि: शोध





संकायाध्यक्ष: डॉ. मनोज कुमार पटैरिया अकथयत् हिन्दी भाषया व्यवहार:, कार्यं च गर्वास्पदम् अस्माकं कृते। वयं स्व भावनानाम् अभिव्यक्तिम् अनया एव भाषया कुर्म:, अत: वयं हिन्दी भाषाया: विकासाय अनुसंधानाय च विशेषतया कार्यं कुर्याम इति महती आवश्यकता। एतत् उपलक्ष्य विश्वविद्यालयस्य प्रमुख परामर्शदाता डॉ. के. एन.एस. यादव: कथितवान् यत् माभारत्या: सेवायै हिन्दी भाषाया: प्रचार-प्रसार: आवश्यक:। विश्वविद्यालयस्य कुलानुशासक: स्वामी आर्षदेव: उक्तवान् यत् संस्कृतिरक्षायै तत्सम्मानाय च हिन्द्यै संस्कृतभाषायै च विशेषतया सम्मानम् अपेक्षितव्यम्। भारत स्वाभिमान (ट्रस्ट) मुख्य: केन्द्रीय प्रभारी स्वामी परमार्थदेव: हिन्दी भाषायै श्रेष्ठतां प्रदातुं पूज्य स्वामिन: श्रद्धेय आचार्यस्य योगदाने विस्तारेण प्रकाशं क्षिप्तवान्। कार्यक्रमे हिन्दी साहित्यस्य महान्त: क्रान्तिकारिण:, कालजयी कवयश्च संस्मृता: । छात्रा: स्वरचितानाम् अथ च प्रमुख कवीनां (रामधारी सिंह दिनकर:, मैथिलीशरण गुप्त:, अटल बिहारी वाजपेयी, हरिवंश राय बच्चन:, डॉ. कुमार विश्वास:, प्रफुल्ल चंद्र कुंवर 'बागी') रचनानां प्रस्तुतीकरणमकुर्वन् । अस्मिन् अवसरे आयुर्वेदीय पादपप्रदानेन उपस्थित अतिथीनां स्वागतं विहितम्। समारोहस्य सफल संचालनं डॉ. निवेदिता एवं च विश्वविद्यालयच्छात्रा: अचल:, गार्गव: हरीशश्च कृतवन्त:। कार्यक्रमे संकायाध्यक्ष: शिक्षणं प्रो. वी.के. कटियार:, संकायाध्यक्ष: योग विज्ञानं प्रो. ओम नारायण तिवारी, संकायाध्यक्ष: प्राकृतिक चिकित्सा डॉ. तोरण सिंह:, परीक्षा नियंत्रक: डॉ. अरविन्द कुमार: इत्येभि: सहिता: विश्वविद्यालयस्य आचार्यगण:, कर्मयोगिगण:, शोधार्थिन: विद्यार्थिनश्च उपस्थिता:।

## साम्प्रतिककाले संस्कृतसाहित्यस्य विज्ञानम् उपयुक्तम्-प्रो.हरिराममिश्रामहाभागा:

अचिरात् एव राष्ट्रसंत-तुकडोजी-महाराज-नागपूर-विद्यापीठस्य स्नातकोत्तर-संस्कृत विभागे संस्कृतसप्ताहस्य प्रारम्भं अभवत्। सप्ताहेऽस्मिन् देहली-नगरस्य जे.एन.यू.-विद्यापीठस्य प्रो.हरिराम मिश्रामहाभागस्य शुभहस्तेन उद्घाटनं सञ्जातम् । आध ुनिककाले संस्कृतसाहित्यं कथम् उपयुक्तम् भवति , इति नैकानि उदाहरणानि दत्वा स्पष्टीकरोति । अस्मिन्प्रसंगे रा. तु.म. नागपूर- विद्यापीठस्य स्नातकोत्तर-संस्कृत विभागप्रमुखा सन्माननीया प्रो. शुचिता दलालमहाभागा अध्यक्षस्थानं विभूषयन्ति । संस्कृतभाषे ते उक्तवन्त: ,वेदोऽपनिषदानां महत्त्वं आधुनिककालेऽपि भवति । संस्कृतभाषा सामान्यजनानामपि ज्ञानसमृद्धा वर्तते, इत्यपि प्रो.हरिराम मिश्रामहाभागेन निवेद्यते । विभागाध्यक्षा प्रो. शुचिता दलालमहाभागा संस्कृतभाषाया: माहात्म्यं विवेचयति । ज्ञानं तथा विज्ञानं इत्यस्य स्पष्टीकरणं कृत्वा महाभागया उक्तम् यद् विज्ञानं अधुना Science इत्यर्थे स्वीकृतमस्ति । तद् समिचिनमेव ,इत्यपि सा अवदत् । संस्कृतदिनसप्ताहं



भारतवर्षे सर्वत्र भवति एव । स्नातकोत्तर-संस्कृतविभागेन आयोजितम् अस्मिन्सप्ताहे नैका: शिक्षका: छात्रा: तथा संशोधका: अपि उत्स्फुर्ततया सम्मिलिता: । संशोधकछात्रा: संशोधनविषयानुसारं सप्तदिने स्व स्व गन्वेशणविषयां स्पष्टयन्ति । अस्मिन् कार्यक्रमे शाल-श्रीफलं दत्वा मिश्रामहाभागस्य सत्कारं परिचयं च प्रो. शुचितादलालमहाभागया कृतम् । कार्यक्रमे सुमधुरावाण्या डा.हर्षदापात्रीकरमहाभागा विद्यापीठगीतं सरस्वतीवन्दनं च अगायत् । डा. तनुजावाघमारेमहाभागा सुचारुरूपेण संचलनं अकरोत्। शान्तिमन्त्रेण कार्यक्रमं समाप्तम् जातम्।

# महर्षिवाल्मीकिसंस्कृतविश्वविद्यालये संस्कृतशिक्षकसम्मेलनस्य भव्यम् आयोजनम्

## संस्कृतदिवसमुपलक्ष्ये संस्कृतसप्ताहस्य शुभावसरे आयोजितस्य त्रिदिवसीय-संस्कृतकार्यक्रमाणां समापनं जातम्।

-डॉ.नवीनकुमारशर्मा:

कैथलनगरम्। हरियाणाराज्ये महर्षिवाल्मीकिसंस्कृत विश्वविद्यालये कैथलनगरे सितम्बरमासस्य चतुर्थे दिनांके संस्कृतशिक्षकसम्मेलनं जातम्। सम्मेलनेस्मिन् 50 संस्कृतशिक्षकैः भागग्रहणं कृतम्। प्रारम्भे परिचयसत्रे सर्वेषां शिक्षकाणां परिचयः जातः। सम्मेलने संस्कृतक्षेत्रे आगतानां विविध-समस्यानां निवारण-विषये



चर्चा जाता। विश्वविद्यालयस्य माननीय-कुलपतिमहोदयेन स्व-उद्बोधने कथितं यत् संस्कृतशिक्षकाः संस्कृतेः सम्पोषकाः भवन्ति। विद्यालयस्तरे छात्राः संस्कृतं पठित्वा अनन्तरं विश्वविद्यालये प्रवेशं प्राप्नुवन्ति। संस्कृतक्षेत्रस्य सर्वे बान्धवाः एकस्यैव परिवारस्य सदस्याः भवन्ति अतः अस्माभिः मिलित्वा संस्कृतोन्नयनार्थं चिन्तनीयम्। सम्मेलने कुरुक्षेत्रात: गीतामनीषी श्रीहरिदेवशास्त्रिवर्योपि समागतः। तेन कथितं यत् संस्कृतं सरलमाध्यमेन प्रायोगिकरीत्या रुचिपूर्णरीत्या च पाठनीयम्।अनन्तरं संस्कृतमंचकैथलस्य अध्यक्षेण श्रीईश्वरदत्तभारद्वाजवर्येण उक्तं यत् संस्कृतक्षेत्रे छात्राणां संख्या अपि संस्कृतशिक्षकेषु निर्भरा भवति। यदि रुचिपूर्णरीत्या पाठ्यते तर्हि विद्यालयेषु छात्राणां संख्यायाम् अवश्यमेव वृद्धिर्भविष्यति। सम्मेलने प्रमुखरूपेण जयभागवानशास्त्री,सुनील आत्रेयः,श्रीकृष्णचन्द्रः,बलवानशास्त्री, डा. सुमन,डा. ज्योति लता,डा.बबीता, सुनीता,वीरभान आदयः अनेके संस्कृतशिक्षकाः समुपस्थिताः। कार्यक्रमस्य संयोजकः डॉ देवेन्द्रसिंहः आसीत्। मंचसञ्चचालनं ज्योतिषाचार्येण डॉ. नवीनशर्मणा कृतम्। एतस्मिन् कार्यक्रमे संस्कृतनिबन्धलेखनप्रतियोगितायाः परिणामानां घोषणा अपि जाता। प्रत्येकस्मिन् विभागे छात्राः प्रथमं 1100/- द्वितीयं 700/- तृतीयं 500/- स्थानं सम्मानित-धनराशिश्च प्राप्तवन्तः। सर्वोत्तम-संस्कृतनिबन्धलेखक-पुरस्कारं धर्मशास्त्रविभागस्य छात्रा निकिता प्रप्रथमं स्थानं 2100/- रुप्यकाणि च प्राप्तवती। एतस्मिन् एव कार्यक्रमे पुरस्कारवितरण-समारोहोपि जातः। यस्मिन् सर्वे प्रतिभागिनः पुरस्कृताः अभवन्। कार्यक्रमेस्मिन् प्रो. भागसिंहबोदला, डॉ.जगतनारायणः, डॉ. सुरेन्द्रपालः, डॉ. रामानन्दमिश्रः, डॉ.कृष्णचन्द्रपाण्डेयः, डॉ. शीतांशुः त्रिपाठी, डॉ.कुलदीपसिंहः, डॉ. सत्येंद्रः आदयः आचार्याः समुपस्थिताः।

# शिक्षकदिवसमभिलक्ष्य समनुष्ठितः कार्यक्रमः

-डॉ.छबिलालन्यौपाने:

बिहारराज्यान्तर्गते दरभङ्गाजनपदे कविनागार्जुनजन्मभूमौ तरौनीग्रामे अवस्थितेन नागार्जुन-उमेश-संस्कृतमहाविद्यालयेन सितम्बरमासस्य ०५ दिनाङ्के शिक्षकदिवसमभिलक्ष्य कार्यक्रमः समनुष्ठितः। विदितमेव तत्रभवतां यद्भारतस्य राष्ट्रपतीनां डॉ०सर्वपल्लीराधाकृष्णन् महोदयानां जनुर्दिवसम् अभिलक्ष्य विपुलेऽपि भारतवर्षे शिक्षकदिवसरूपेण आमन्यते। कार्यक्रमस्यामुष्य शुभारम्भः महाविद्यालयस्य प्रधानाचार्येण डा० रामसंयोगरायमहोदयेन व्यधायि। अवसरेऽमुष्मिन् महाविद्यालयीयान्तेवासिनः ( अंजूकुमारी,



तुलसीकुमारी, नीतिशकुमारः, सोमनाथझा, बाबूराजः, कबीरदासः, सुरेशकुमारसहनी, दर्शनकुमारझाः, तिलककुमारझाः, रोहितकुमारमिश्रा, अभिलाषाकुमारी, अंकिताकुमारी प्रभृतयः) आदर्शसमाजस्य निर्माणे शिक्षकस्य भूमिकेति विषयमुरीकृत्य स्व-स्वविचारान् प्रत्यपादयन्। अथातो महाविद्यालयस्य सहायक-प्राध्यापकैः (डा०रंजीतकुमारठाकुरः, डा० रेणुझाः, डा० सरिताकुमारी, डा० नियतिकुमारी, डा० विभूतिनाथझाः, डा० नितेशकुमारमिश्रः) तथा शिक्षकेतरकर्मचारिभ्यां (राजकुमारझामहोदयः, मुकुन्दकुमारमहोदयः) शिक्षकदिवससम्बद्धतथ्यानि समुद्घाटितानि। कार्यक्रमस्य संयोजिकया डा० सरस्वतीकुमारीवर्यया 'शिक्षायास्त्रीण्यधिकरणानि' (शिक्षकः, शिक्षार्थी एवं अभिभावकः) इति विषयममुमवलम्ब्य चर्चा समाम्नाता। महाविद्यालयस्य प्रधानाचार्येण डॉ० रामसंयोगरायमहोदयेन स्वकीयेन अध्यक्षीयभाषणेन छात्रान् उद्बोधयता उक्तं यत् शिक्षकः युगस्य निर्माता भवति। यस्याङ्के निर्माणं प्रलयश्चोभावपि वर्धेते। एतैः रामायण-महाभारत-पुराणकालीनानां गुरुशिष्याणां मध्ये व्याप्ताः स्वस्थाः स्वच्छाश्च सम्बन्धाः रेखाङ्किताः। दर्शनविषयकसहायकप्राध्यापकेन डॉ. छबिलालन्यौपानेमहोदयेन कार्यक्रमस्यामुष्य मञ्चस्य गभीरतया सञ्चालनं कुर्वतोक्तं यच्छिष्येषु ज्ञानरूपिबीजस्य वपनम् अध्यापकः एव करोति। एतैः मञ्चसञ्चालनक्रमे मालविकाग्निमित्र-श्रीमद्भागवतपुराण-गीता-हितोपदेश-नीतिशतकप्रभृतिग्रन्थेषु वर्णिताः शिक्षकविषयकविचाराः उद्धृताः।

# प्रोफेसर उपेन्द्रत्रिपाठिनः मानदाऽऽचार्य-रूपे नियुक्ताः



काशीहिन्दूविश्वविद्यालयस्य वैदिकविज्ञानकेन्द्रस्य समन्वयकाः तस्यैव विश्वविद्यालयस्य संस्कृतविद्याधर्मविज्ञानसङ्कायस्य वेदविभागस्य अध्यक्षचराश्च प्रो०उपेन्द्रत्रिपाठिनः बहुविषयकविकासानुसन्धानके केन्द्रेण(सी.एम.डी.आर. )धारवाड़स्थितेन वर्षत्रयार्थं मानदौचार्यरूपे नियुक्ताः। बिहारप्रदेशस्य गोपालगङ्जेति जनपदस्य कुचायकोटनामधेयस्य प्रखण्डस्य ढेबवानामाख्यग्रामस्य वास्तव्यस्य प्रो०जगन्नाथत्रिपाठिनां प्रौत्राः इमे प्रो०उपेन्द्रत्रिपाठिनः। बहुविषयकविकासानुसन्धानकेन्द्रेण(सी.एम.डी.आर.)धारवाड़स्थितेन अनुसन्धानपरियोजनया, विभिन्नप्रकाशनेन,नीतिपत्रेण नीतिसंक्षेपकार्येण च सहैव संस्थानस्य अनुसन्धानशैक्षणियोश्च गतिविधयः गतिप्रदानाय,संस्थानस्य च सदस्येभ्यः मार्गदर्शनं प्रदातुं प्रो०त्रिपाठिनां नियुक्तिः कृता वर्तते।उदन्तमिदं श्रुत्वा विश्वैपि जनपदे हर्षोल्लासस्य वातावरणं वरिवर्ति।

# भारतस्य प्रतिष्ठा संस्कृतनिष्ठा

(वत्सदेशराजशर्मा)

बिहारराज्यान्तर्गते दरभङ्गाजनपदे कविनागार्जुनजन्मभूमौ तरौनीग्रामे अवस्थितेन नागार्जुन-उमेश-संस्कृतमहाविद्यालयेन अगस्तमासस्य २९ दिनाङ्कात् आरभ्य सितम्बरमासस्य ०३ दिनाङ्कं यावत् संस्कृतसप्ताहस्य आयोजनं कृतम्। अवसरेऽस्मिन् छात्रेषु निहितप्रतिभां प्रकाशयितुं प्रश्नोत्तरम्,




निबन्धलेखनम्, भाषणम्, पाणिनीया-अष्टाध्यायी-सूत्रान्त्याक्षरी, श्लोकान्त्याक्षरी, सस्वरश्लोकवाचनम्, चित्रनिर्माणं प्रभृतीनां प्रतियोगितानाम् आयोजनमपि विहितम्। एतासु प्रतियोगितासु प्रथमद्वितीयतृतीयस्थानभाजः प्रतिभागिनः अतिरिच्य भागग्रहीतारः प्रतिभागिनः सान्त्वनापुरस्कारैः पुरस्कृताः। समारोहेऽस्मिन् महाविद्यालयस्य शिक्षकैः (डॉ. रंजीतकुमारठाकुरः, डॉ. नीतेशकुमारमिश्रः, डॉ. विभूतिनाथझाः, डॉ. रेणुझाः, डॉ. नियतिकुमारी) तथा शिक्षकेतरकर्मचारिभ्यां (राजकुमारझा , मुकुन्दकुमारः) च स्व-स्वविचाराः प्रकटीकृताः। छात्रान् सम्बोधयन्ती कार्यक्रमस्य संयोजिका डॉ.सरस्वती-कुमारी अवदत् यत् सद्गुणस्य मूल्यानाञ्च निर्माणे संस्कृतभाषायाः महत्त्वपूर्णा भूमिका अस्ति इति। अध्यक्षीयभाषणे महाविद्यालयस्य प्रधानाचार्येण डॉ. रामसंयोगरायमहोदयेन उक्तं यत् भारतस्य प्रतिष्ठा संस्कृते संस्कृतौ च आधारिता अस्ति। संस्कृतविषये वृत्तेः अवसराणाम् अभावो नास्ति इति। दर्शनविषयकसहायकप्राध्यापकेन डॉ. छबिलालन्यौपानेमहोदयेन कार्यक्रमस्यास्य मञ्चस्य सम्यक्तया सञ्चालनं कुर्वता उक्तं यत् राष्ट्रीयचेतनायाः सूत्राणि संस्कृतभाषायां निहितानि सन्ति। अतः राष्ट्रियभावनायाः प्रचाराय प्रसाराय च संस्कृतभाषायाः तन्निबद्धशास्त्राणाञ्च अध्ययनम् अध्यापनं च अनिवार्यम्।

# राष्ट्रियशिक्षकदिवसे भारतीपब्लिकस्कूल इत्याख्येन प्रशासनेतर विद्यालयेन विमोचितासंस्कृतपत्रिका

-डॉ.युवराजभट्टराई

नव दिल्ल्याः, सर गंगाराम चिकित्सालय मार्ग स्थिते बालभारतीपब्लिकस्कूल इत्याख्ये प्रशासनेतर विद्यालयेन



संस्कृत-भाषायां प्रकाशितायाः संस्कृत-संवर्धन-संरक्षण-परायाः "संस्कृत-सौगंधिका" इत्याख्यायाः संस्कृत पत्रिकायाः द्वितीयाङ्कस्य विमोचनं शिक्षक-दिवसावसरे आयोजिते भव्य समारोहे विद्यालयस्य प्रधानाचार्यस्य श्री एल.वी. सहगलस्य कर-कमलाभ्यां विहितम्। ध्यानास्पदमस्ति यद् विद्यालय-द्वारा राष्ट्रिय-शिक्षक-दिवसस्य अवसरे शिक्षकाणां सम्मानार्थं प्रतिवर्षम् भव्यः कार्यक्रमः समायोज्यते। संस्कृतस्य प्रसार-प्रचारे छात्रेषु संस्कृतम् प्रति रुचिसंवर्धनार्थं विद्यालयस्य राष्ट्र-व्यापि-कार्याणां संकल्पानां च सम्पूर्तये विगत-वर्ष-तः संस्कृत-पत्रिकायाः प्रकाशनम् प्रारब्धम् आसीत् । यस्याः द्वितीयः अङ्कः अत्र विमोचितः एतस्मिन् अवसरे समारोहं सम्बोधयता प्राचार्येण सहगलवर्येण प्रोक्तं यत् अस्माकं विद्यालयस्य छात्राणां मध्ये संस्कृताध्ययनस्य अभिरुचेः अत्यधिकः विस्तारः भवेत् येन छात्राः भारतस्य स्वर्णिमम् ऐतिह्यम् ऋषि-मुनि-वर्धितं बौद्धिकं रिक्थं च बोद्धुं प्रभवेयुः। अमुना संस्कृत-सौगन्धिकायाः सफलतायाः अपि विश्वासः प्रकटितः। अस्मिन् अवसरे विद्यालयस्य सर्वे शिक्षकाः उपस्थिताः अवर्तन्त।

प्रथमपुटस्य शेषभागः

# संस्कृतमहोत्सवस्य समापनकार्यक्रमः

प्रो हरेराम त्रिपाठी महाभागाः अभ्यागतान् स्वागतीकृत्य भगवत्याः सरस्वत्याः पूजां मङ्गलाचरणं च कृत्वा कार्यक्रमम् आरभन्। अस्मिन् कार्यक्रमे अधिमञ्चं मख्यातिथित्वेन संस्कृतभारत्याः अखिलभारतीयप्रचारप्रमुखाः श्रीशिरीषभेडसगावकरमहोदयः, सारस्वतातिथित्वेन च संस्कृतप्रचारिणीसभायाः सचिवः डा. चन्द्रगुप्त वर्णेकरमहोदयः, विशेषातिथित्वेन च बालरङ्गभूमिपरिषदः श्रीमती आभामेघे महोदया, विश्वविद्यालयस्य कुलसचिवः, परिसरसञ्चालकाः, कार्यक्रमसंयोजकाः च आसन्। तत्रादौ मा. कुलसचिवः सर्वान् स्ववाग्व्यापारेण स्वागतीकृतवान्। ततः परं संस्कृतप्रचारिणीसभायाः सचिवः डा. चन्द्रगुप्त वर्णेकरमहोदयः तन्त्रज्ञानं संस्कृतभाषायुतं, संस्कृतं तन्त्रसंयुतं भवेत् येन च आधुनिके युगे संस्कृतं समाजे युवभ्यः नवमार्गदर्शकं भवेत्। आधुनिकयुगस्य या अपेक्षा सा च संसोधन माध्यमेन पूरणीया। यतः प्राक्काले अपि ऋषयः वैज्ञानिकाः आसन् स्वीयं ज्ञानराशिं ते स्वीयग्रन्थेषु उपन्यबध्नन् तच्च शोधमाध्यमेन युवभिः समाजे आनेतव्यम्। ततः परं श्रीमती आभमेघे महोदया स्वसंस्थायां प्रचाल्यमानसंस्कृतपाठनविषये चिन्तनं प्रास्तौत्। सर्वभाषाणां मातृभूतत्वात् संस्कृतस्य सर्वादरणीयत्वम्, संस्कृतस्य देवभाषात्वात् अध्ययनेन भाषणेन च पुण्यजनकत्वम् इत्यादि नैकान् विषयान् उपास्थात्। ततः परं शिरीशमहोदयैः स्ववाग्व्यापारैः संस्कृतस्य सर्वसंवेद्यत्वं पाण्डुलिपीनां सम्पादनमित्यादि नैके विषयाः न्यरूपिषत। अत उत्तरं सम्मान्याः कुलपतयः प्रो हरेराम त्रिपाठी महाभागाः सर्वान् अभ्यागतान्, संस्कृतमहोत्सवं निमत्तीकृत्य षट्पञ्चाशत् संस्कृतसंभाषणशिविरचालकान्अभिनन्द्य, छात्राचार्यान् च संक्षेपेण अनूनदन्।अयं च कार्यक्रमः अरुन्धना इति संस्कृतनाटकेन समाप्तिम् अगात्।

# ओजस् 2023 इत्यस्यां प्रतिस्पर्धायां शिक्षकाः पुरस्कृताः

-डॉ. अल्पनाशर्मा

जयपुरम्। हिन्दीदिवसमुपलक्ष्य जयपुरे संजयशिक्षकप्रशिक्षणमहाविद्यालयेन १४ सितम्बर २०२३ दिनाङ्के अन्तरमहाविद्यालयी प्रतियोगिताः ओजस २०२३ इत्यस्य आयोजनं विहितम्। अस्मिन् अवसरे प्रतिभागिनः सुमधुरस्वरयुक्तानि काव्यानि पठितवन्तः । अस्मिन् काव्यपाठे श्रृंगाररसतः वीररसपर्यन्तं स्वरचितकाव्यद्वारा विभिन्नविधा, भावः, अलंकार, गौसेवा, कौन हूँ मैं, हिन्दी तुझे सलाम, हमारा मान है हिन्दी, 'पापा की नन्ही परी' आदि उपमाओं से युक्त इत्यादि सुन्दरं प्रस्तुतीकरणं कृत्वा सम्पूर्णं वातावरणं सुखदं कृतवान्। निर्णायकैः मूल्याङ्कने सारगर्भितशब्दानां प्रयोगे, समयप्रतिबद्धतायाः, उच्चैः शब्दस्य च विशेषं ध्यानं दत्त्वा प्रथमद्वितीयतृतीयस्थानार्थं प्रतिभागिनां चयनं कृतम्। कार्यक्रमे २५ महाविद्यालयेभ्यः ५० प्रशिक्षुप्रतिभागिनः १२ शिक्षकप्रतिभागिनः च भागं गृहीतवन्तः। प्रशिक्षुवर्गे प्रथमं स्थानं हर्षिता हल्देनिया, बियानी-बालिका-महाविद्यालयः, द्वितीय स्थान कलादित्य केशव शर्मा संजयशिक्षकप्रशिक्षणमहाविद्यालयः, तृतीयस्थानं नेहा चौधरी मेहताशिक्षक-प्रशिक्षणमहाविद्यालयः तथा राशि जैन एस. जैन सुबोधशिक्षक-प्रशिक्षण-महाविद्यालयद्वारा प्राप्तः। शिक्षकवर्गे में प्रथमं स्थान डॉ. पुष्पादेवी, आकाशशिक्षक-प्रशिक्षण-महाविद्यालय-जयपुरम्, द्वितीयस्थानं श्रीमती उषाशर्मा संजयशिक्षक-प्रशिक्षण-महाविद्यालयः तथा तृतीयस्थानं श्रीमती इतीशर्मा मीराबालिका-महाविद्यालयद्वारा प्राप्तः। प्राचार्यः निर्णायकश्च कार्यक्रमे प्रथमद्वितीयतृतीयस्थानं प्राप्तवन्तः सर्वेषां प्रतिभागिनां स्मृतिचिह्नानि प्रमाणपत्राणि च दत्त्वा सम्मानितवन्तः प्रेरिताः च। प्रतियोगितायाः सर्वेषां प्रतिभागिनां प्रमाणपत्रैः अपि सम्मानः कृतः। कार्यक्रमस्य अन्तिमभागे कार्यक्रमसमन्वयिका डॉ. अल्पना शर्मा प्रत्यक्षतया परोक्षतया च भागं गृहीतवन्तः सर्वेभ्यः धन्यवादं दत्तवती। प्रेषितश्च शुभकामना अभिवादनानि अस्मिन् शुभे दिने सर्वे भागगृहीतारः तथा विभिन्नमहाविद्यालयानां शिक्षकाः छात्राश्चोपस्थिताः समभवन्।



# संस्कृतभाषायाः शास्त्राध्ययनस्य साम्प्रतिके काले आवश्यकता

अभिनवपाठ्यक्रमाणां शुभारम्भकार्यक्रमस्य अध्यक्ष्यभाषणे ( 09/09/23 ) केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिभिः उक्तं यत् - "बहुभ्यः वर्षेभ्यः प्रतीक्षितः मुक्तस्वाध्यायपीठस्य शैक्षिककार्यक्रमः अधुना पुनरपि समारब्ध इति आनन्दस्य विषयः। A++ इत्येषा विशिष्टा श्रेणी राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा प्रदत्ता वर्तते। पुनः प्रथमवर्गीयः विश्वविद्यालयः इति विश्वविद्यालयानुदानायोगेनापि प्रत्यायितः विश्वविद्यालयः एषः। अनेन विश्वविद्यालयेन अधुना आरब्धाः अभिनवपाठ्यक्रमाः भारतदेशस्यैव अभिनवपाठ्यक्रमाः सन्ति। आधार कार्ड सदृशं कार्ड (पत्रम्) अग्रिमेषु दिवसेषु सर्वेभ्यः छात्रेभ्यः उपलभ्यते। तस्मिन् पत्रे छात्रस्य सर्वविधं शैक्षिकवृत्तं निगूहितं भविष्यति। अस्य उपयोगं छात्रः यस्मिन् कस्मिन्नपि देशे सन्दर्भे च कर्तुं प्रभविष्यति। एवं नवाचाराः बहवो हि अस्माभिः आरब्धाः सन्ति। महता परिश्रमेण प्राप्ता A++ इत्येषा विशिष्टा श्रेणी संस्कृतशिक्षायाः मुक्तरूपेण प्रसाराय सहकारिणी वर्तते। अतः तन्महत्त्वं वयं जानीमः। विश्वविद्यालयेन इतोऽपि विशिष्टाः अभिनवपाठ्यक्रमाः समारभ्यन्ते। भारतीयाः सर्वे लाभान्विताः भवन्तु। Online माध्यमेन प्रसारिताः विद्याः सर्वेषां हस्तगताः स्थायिन्यश्च भविष्यन्ति इति मे दृढविश्वासः। सर्वेषां शुभं भवतु।




# सम्पूर्णे विश्वे संस्कृतस्यैव भवति वार्ता-विनयश्रीवास्तवः

- गोपालकृष्णमिश्रः

उत्तरप्रदेश-संस्कृतसंस्थान-लखनऊद्वारा २०२३ तमस्य वर्षस्य सितम्बरमासस्य २० दिवसीय-संस्कृतभाषाशिक्षणकक्ष्यायाः मङ्गलवासरे शुभारम्भो जातः । उत्तर-प्रदेश-संस्कृत-संस्थानस्य निदेशकः विनयश्रीवास्तववर्यः उक्तवान् यत् सम्प्रतिष् चन्द्रयानं ३ भारतदेशेन प्रक्षेपणं कृतम। तत्र इसरो इति संस्थायाः प्रमुखः एस.सोमनाथमहोदयः उक्तवान् यत् विश्वेऽस्मिन् यत् किमपि विज्ञानमस्ति, तत् सर्वमपि वेदेषु वर्णितमस्ति पूर्वमेव । केवलं तस्य ज्ञानविज्ञानयोः उपरि अनुसन्धानस्यावश्यकता वर्तते । अतः विश्वे संस्कृतं ज्ञातुं पठितुं च जनाः प्रेरिताः अभवन्। एवमेव संस्थानमपि निःशुल्कं संस्कृतं पाठयित्वा जनान् संस्कृतं संस्कृतिं च ज्ञातुं प्रेरयति। सर्वेक्षिका डॉ. चन्द्रकलाशाक्यावर्या उक्तवती यत् संस्कृतस्य प्रचाराय प्रसाराय च वयं कटिबद्धाः भवेम। प्रशिक्षणप्रमुखः श्रीसुधीष्ठमिश्रमहोदयः उक्तवान् यत् कक्षाणां सञ्चालनं सम्यक्प्रकारेण भवति । इतोपि जनाः संस्कृतं पठित्वा संस्कृतेतरक्षेत्रेष्वपि गच्छेयुः तदर्थं प्रयासः चलति । प्रशिक्षणसमन्वयकः श्रीमान् धीरजमैठाणीवर्येण संस्थानस्य योजनाः विस्तरेण उक्ताः। सः अवदत् यत् प्रतिमासं त्रितः चतुस्सहस्रं शिक्षार्थिनः संस्कृतं पठितुं पञ्जीकरणं कृत्वा पठन्तः सन्ति । आभासीयमाध्ययेन कक्षाणां सञ्चालनं संस्थानस्य प्रशिक्षकः गोपालकृष्णमिश्रः कृतवान् । प्रशिक्षकमहोदयेन उक्तं यत् प्रतिदिनं द्वितीयस्तरस्य प्रथमा कक्षा प्रातःकाले अष्टवादनतः नववादनपर्यन्तं तथा च द्वितीया कक्षा सायं काले सप्तवादनतः अष्टवादनपर्यन्तं भविष्यति । प्रथमे दिवसे महोदयेन वर्णामालायाः उच्चारणस्थानस्य च पाठनं कारितम् । अत्र छात्रेभ्यः संस्थानं न कमपि शुल्कं स्वीकरोति । ये प्रथमस्तरं पठितवन्तः, ते द्वितीयस्तरस्य कक्षायां पठन्ति ; तथैव ये प्रथमवारम् आगच्छन्ति तेषां पञ्जीयनं पठनञ्च प्रथमस्तरे भवति । पञ्जीयनम् उत्तर-प्रदेश-संस्कृत-संस्थानस्य वेबसाईट upsanskritsansthanam.in द्वारा भविष्यति । कक्षाणां सञ्चालनं उत्तरप्रदेशसंस्कृतसंस्थानस्य प्रशासनिकाधिकारी डॉ. दिनेश मिश्रः, जगदानन्दः झाः, कक्षानिरीक्षणकर्तारौ श्रीमान् दिव्यरञ्जनः सुश्रीः राधाशर्मा च, इत्यादीनां नेतृत्त्वे भवति । आभासीय-माध्यमेन संचालितायां द्वितीयस्तरस्य कक्षायां त्रिंशदधिक-संस्कृतानुरागिच्छात्राः समुपस्थिताः आसन्।

# पद्मभूषण-आचार्यपट्टाभिरामशास्त्रिपुण्यस्मृति-समारोहो वेदविद्यार्थीसम्मेलनञ्च

डा०धीरजकुमारमिश्रः

श्रीपट्टाभिरामशास्त्रीवेदमीमांसौनुसन्धानकेन्द्रे,वाराणस्यां 01/09/2023 दिनाङ्के पद्मविभूषणविभूषितानामगणितशास्त्रपारावारपारीणानाञ्च त्रयस्त्रिंशत्पुण्यतिथिमभिलक्ष्य श्रद्धाञ्जलिसभायाः वैदिकवटुकसम्मेलनञ्च श्रीपट्टाभिरामशास्त्रीवेदमीमांसौनुसन्धानकेन्द्रस्थितसभागारे समायोजितम्। अवसरेस्मिन् विभिन्नविश्वविद्यालयेषु महाविद्यालयेषु च प्राध्यापकपदमलंकुर्वन्तः परश्शतं



पुरातनछात्त्रास्समुपस्थिताः। तदुपवेशने केन्द्रस्य कोषाध्यक्षाः प्रो०मनुलताशर्ममहाभागाः अवाचयन् यद्वेदविद्यासंरक्षणं सम्वर्धनञ्चौव केन्द्रस्यास्योद्देश्यमस्तीति। केन्द्रेणौनेन यथाकालं प्रकाश्यमानायाश्शोध पत्रिकायायाः अनुसन्धानवल्लरीति नामधेयपत्रिकायाः सम्पादिकाः डा०चन्द्रकान्तारायमहाभागाः अवादिषुर्यद्वेदाध्ययनेन साकं सकलशास्त्रोपनिषद्भूतशब्दशास्त्रस्याध्ययन-मप्यत्यन्तमावश्यकमिति।काशीहिन्दूविश्वविद्यालयस्य कलासङ्कायस्य सङ्कायप्रमुखाः वेदविद्याविलासविद्योतितौन्तःकरणाः आचार्यश्रीकिशोरमिश्रमहाभागाः नैजोद्बोधनोपक्रमैभाषिषत यत् केन्द्रमिदं वेदविद्याविकासाय समर्पितमस्ति,एकसप्तत्युत्तर-एकोन्विशतिसहस्त्रतमे वर्षे स्थापितमिदं केन्द्रं वेदविद्योपलब्ध ाखिलशाखोपशाखाणां संरक्षणं कुर्वद्वरिवर्ति।अत्रत्याः विद्यासमुपासनैकमात्रकर्मसंलग्नाः विद्यार्थिनः राष्ट्रस्य प्रत्येकस्मिन् संस्कृतश्वविद्यालयैध्यापनकर्मविशेषे संलग्नाः वर्तन्ते।अवसरैस्मिन् काशीहिन्दूविश्वविद्यालयस्य कलासङ्कायस्य धर्मदर्शनविभागस्य आचार्यैः प्रो०मुकुलराजमेहतामहाभागैः पुरातनसंस्मरणं संश्रावितं वेदविद्यायाः प्रचारे प्रसारे च बलं प्रदेयमित्युपादितम।अथ च केन्द्रस्थितः पुस्तकालयो राष्ट्रन्यासौस्तीत्यपि समुद्घोषितम्। कार्यक्रमस्य सादस्पत्यं सम्पालयन्तो जगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयस्य कुलपतिचराः,राष्ट्रपतिभारतात्मौद्यनेकविधपुरस्कारपुरस्कृताः आचार्ययुगलकिशोरमिश्रमहाशयास्स्व-कीयाध्यक्षीयोद्बोधनैभाणिषुर्यद्वेदविद्यैवाखिलजगतो जीवितमिति।वेदविद्यां विना जीवनकल्पनमप्यशक्यमेव, अद्यतनीये कालखण्डे वेदप्रतिपादितज्ञानविज्ञानं वैज्ञानिकैरपि मुक्तकण्ठेन स्वीक्रीयते अत एव वेदविद्योपात्तज्ञानविज्ञानस्य सौलभ्यं कथं समेषां जनानां कृते स्यादित्यस्माभिर्यतनीयमिति।कार्यक्रमस्यास्य सम्पूर्त्यवसरे केन्द्रस्य सहसचिवैः डा०गङ्गाधरमिश्रमहाशयैस्समेषां कृते आधमर्ण्यभावाः धन्यवादवचांसि च समर्पितानि,कार्यक्रमस्य सञ्चालनं डा०शैलेन्द्रनाथदीक्षितैः विहितं अवसरैस्मिन् केन्दैधियानास्सकलाः प्राध्यापकाः, छात्त्राः,कर्मचारिणश्च समुपस्थिता आसन्।

# भारतीयज्ञानपरम्परायां सुस्थितजीवनशैली राष्ट्रियशिक्षानीतिश्च २०२० इति विषये सञ्चालिता व्याख्यानमाला

डॉ.आरतीशर्मा

नवदेहली। भारतसर्वकारस्य शिक्षामन्त्रालयस्य बहुआयामिपरियोजना-पण्डितमदनमोहनमालवीयराष्ट्रिय-शिक्षकशिक्षणमिशनमित्यस्य अन्तर्गत्वेनस्थापितेन नवदेहलीस्थ श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-विद्यालयस्यशिक्षणाधिगमकेन्द्रेण श्भारतीय ज्ञान परम्परा : 'NEP-2020' इति विषयं स्वीकृत्यारब्ध । व्याख्यानमालाश्रृंखला। व्याख्यानमालायाः पञ्चमश्रृंखलायाः शीर्षकंभारतीयज्ञानपरम्परायांसुस्थितजीवनशैलीः राष्ट्रियशिक्षानीतिः 2020इत्यासीत। अस्यां व्याख्यानमालायाः सप्तपञ्चाशताधिकैकशतं प्रतिभागिभिः भागं ग्रहीतम। व्याख्यानमालायां शिक्षणाधिगमकेन्द्रस्य निदेशिका सुप्रसिद्धाचार्याप्रो. अमितापाण्डेयभारद्वाजमहोदयामुख्यवक्तारूपेण आसीत। कार्यक्रमस्य शुभारम्भं मङ्गलाचरणेन कृतम। अनेन सहैव विश्वविद्यालय एवं केन्द्रपरिचायनाय एकं लघुचलचित्रं प्रदर्शितम् । व्याख्यानमालायाः मुख्यवक्ता प्रो. अमितापाण्डेयभारद्वाजमहोदयया भारतीयशास्त्रेषु वर्णितसुस्थितजीवनशैलीविषये चर्चा कृता। विशेषतः अष्टांगयोगस्य सर्वेषां तत्वानां विशद्तया चर्चा कृता। एवञ्च आधुनिकजीवनशैल्यां योगाहारश्च इत्यस्य महत्वं बोधितम। अन्ते च संचालिका डॉ. तमन्नाकौशल महोदयया ऑनलाइन रूपेण समुपस्थितानांसर्वेषां विदुषां - प्रतिभागिनां - प्रत्यक्षाप्रत्यक्षरूपेण सहयोगकृतृणां धन्यवादज्ञापनं कृतम् । शान्तिपाठेन सह व्याख्यानमालासमापिता।


## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249**

# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

प्रधानमंत्री नरेंद्र मोदी कथयत् यत् देशे एकस्य षड्यंत्रस्य अन्तर्गतं, सनातन संस्कृतिं समापयितुं यत्नः क्रियते। यच्च देशाय अत्यन्तं चिंताजनकम्। वस्तुतः सनातन धर्मः स्वनाम्ना एव स्पष्टः यत् एषः मानव संस्कृतेः पुरातन संस्कृतेश्च परिचायकः। संभवतः यस्य उदयः जम्बू द्वीपस्य भरत खंड क्षेत्रीये भारत देशे वेदानां रचना समये अभविष्यत, यस्य कश्चित् कालः नैव निर्धारयितुं शक्यतेस अद्य पूर्णविश्वः सनातन धर्मेण आधारितां भारतीय संस्कृतिं परंपरां च अनुसरति। गत दिनेषु भारतद्वारा 'जी-20' आयोजने यथा वैदेशिकैः राष्ट्रियाध्यक्षैः प्रतिनिधिभिः भारतीय संस्कृतिः प्रशंसिता, यस्य आधारः भारतीय सनातन धर्मः संस्कृतिश्च एवस यदि वयं सनातन संस्कृतेः पृष्ठभूमिम् अवलोकयेम तर्हि ज्ञायते यत् संस्कृत भाषा तत् साहित्यं च अस्य मूलः आधारः। संस्कृत भाषा भारतीय संस्कृतेः प्राचीनतमभाषा। यया मानव सभ्यता जन्म अलभत। भारतीय संस्कृतिं, परंपराः, संस्कारांश्च संस्कृत भाषातः पृथक न कर्तुं शक्नुमः। गत पक्षे प्रतिवर्षमिव संस्कृत सप्ताहः अपि समाचितः स परंतु एषोऽपि अत्यंतं खेदजन्यो विषयः अस्मद्देशस्य सनातन जीवन पद्धत्या आधारितः संस्कृतोत्सवः एकं सप्ताहं यावत् सीमितः कृतः। वस्तुतः संस्कृत भाषा अस्माकं संस्कृते सनातनस्य च परिचायिका या च अस्माकीनया शासकीय सत्तया गभीरतया अवगन्तव्या। संस्कृत भाषायाः प्रचारे प्रसारे शासनस्य भूमिका महत्वपूर्णं स्थानं भजते। शासकीय स्तरे संस्कृत भाषायाः उपेक्षा असहनीया। शासकीय उपेक्षा कारणेन गतेभ्यः कतिपयवर्षेभ्यः संस्कृत भाषायाः शीर्ष राष्ट्रिय सम्मानं 'राष्ट्रपति पुरस्कारः' स्थगितः। किं सर्वकारेण एतत् मतं यत् भारतीय संस्कृत विद्वतायाः ह्रासः जायते । यस्य कारणेन तावत् सम्मानं न दियते। यत् हि सर्वथा असत्यम्। अद्य देशे एतादृश संस्कृत विदुषां नास्ति स्वल्पता, ये प्रसारात् प्रसाराच्च दूरं भारतीय ज्ञान परंपराणां ध्वजवाहकाः विद्यन्ते स अत एषां विद्वता प्रोत्साहनीया सम्माननीया च इत्येतत् सत्तायाः मुख्यं कर्तव्यम्।

भवदीया

सम्पादिका

## ॥ वेद वाणी ॥

'द्यौष्पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृळता नः ।
विश्व आदित्या अदिते सजोषा अस्मभ्यं शर्म बहुलं वि यन्त॥
'मा नो वृकाय वृक्ये समस्मा अघायते रीरधता यजत्राः ।
यूयं हि ष्ठा रथ्यो नस्तनूनां यूयं दक्षस्य वचसो बभूव॥'

' The heaven that gives us rain and thus food for nourishment is our father; and the innocent and affectionate Earth that treats all living beings as equal is mother. And Agni that helps all is our brother. May all these gods together keep us most comfortable and happy. ""'O! Mighty and all-powerful Gods! Never let us go into the hands of cunning and evil-minded people who are like wolves. May we not go into the control of sinners either. You are Lords of our bodies. You, may, therefore, nourish our bodies and strengthen them. '

The Rig Veda 6.51.5&6

'वयमु त्वा पथस्पते रथं न वाजसातये ।
धिये पूषन्नयुज्महि॥
अदित्सन्तं चिदाघृणे पूषन्दानाय चोदय ।
पणेश्चिद्वि म्रदा मनः॥
'वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियम् ।
अथेमस्मभ्यं रन्धय॥'

'O ! Pushan ( Sun- God) ! Guard and Guide to the right path in life! We latch on to you as one does to a chariot. You bring us food and direct our mind in doing meritorious deeds.""'O! Effulgent Lord Pushan! Inspire a niggardly person to be generous. Let him give liberally money to those deserving it. Soften the heart of a miser who has the narrow mind of a tight-fisted businessman.""'O! Nourishing God Pusan! Pierce an avaricious man with your goad and prod him to do beneficial things for all people. Let him not give sorrow to others for his own gainn. For the sake of the devout and good, eliminate enemies who torment the world with their cruel acts.'

The Rig Veda 6.53.1/3/6"

**संकलन : एस.वासुदेव रावः**

# पद्मश्रीरमाकान्तशुक्लकाव्येषु राष्ट्रियभावना

प्रस्तोता-डॉ. राजकुमार मिश्रः 'कुमारः'
(सहाचार्यः, साहित्यविभागः)
हरियाणासंस्कृतविद्यापीठम्,
बघौला, पलवलम्, हरियाणा- १२११०२

अर्वाचीनसंस्कृतकवितायां राष्ट्रियभावनाया विविधाः स्वरा दृष्टिपथमायान्ति। यद्यपि राष्ट्रभावनायाः स्वरो वैदिकसाहित्येऽपि समुपलभ्यते- **'माता भूमिः पुत्रोऽहं पृथिव्याः', 'वयं राष्ट्रे जागृयाम पुरोहिताः', 'मित्रस्य चक्षुषा समीक्षामहे'** इतिरूपेण। एवमयमेव राष्ट्रियभावनायाः स्वरः पुराणेष्वपि उपलभ्यते यथा-

**गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे।**
**स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात्[1]॥**

एवमेव स्मृतिवाङ्मयेऽपि यथा-

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः[2]॥**

एवमेव लौकिकसाहित्येऽपि प्रायेण प्रतिकविकाव्यं प्रकरणविच्छित्त्या राष्ट्रियभावनायाः स्वरः चित्रितो वर्तत एव। प्राक्तने साहित्ये उदात्तराष्ट्रकृते कीदृशी भावना अपेक्षिता भवतीति प्रतिपादितं वर्तते। प्राचीनसाहित्योपदिष्टा राष्ट्रविषयिणी भावना यदा स्वाधीनताकाले दुश्शासकैः खलीकृता तदा तदानीन्तनैः कविभिः तामेव सर्वोद्धारक्षमां भावनामानेतुं विविधस्वरेण काव्यानि प्रणीतानि, यत्र क्वचिद् राष्ट्रवन्दनम्, आङ्ग्लशासनं प्रति विरोधः, ऐतिह्यस्मरणं, शाश्वतमूल्यस्थापनप्रेरणा चेति विषयाः प्रामुख्येन वर्णिताः। पद्मश्रीविरुदविभूषिते कवित्वशुक्ले रमाकान्तशुक्ले राष्ट्रिया भावना कुतो जागरिता इत्यस्या जिज्ञासायाः कृते उत्तररूपेण तदीयपरिवेश एव आयाति। रमाकान्तशुक्लवर्यस्य जन्म स्वतन्त्रताप्राप्तेः पूर्वम् अर्थात् 1940 तमे ख्रिष्टाब्देऽभवत्। तस्मिन् काले तत्प्राग्वर्तिनां कवीनां कवितायाः स्वरः प्रायो राष्ट्रविषयक एव भवति स्म। यदा कविवरो रमाकान्तशुक्लो रचनारम्भम् ऐच्छत् तदा स कविताया वर्ण्यविषयत्वेन राष्ट्रस्वरमेव कविमुखात् श्रुतवान् दृष्टवान् च इत्थं तदीयमनसि राष्ट्रियभावनायाः कश्चन संस्कारविशेषो भावः प्रस्फुटितः। मनसि यो हि भावो भूयोभूय आगच्छति तस्यैव प्रभावो बलीयान् हृदयकृतस्थानश्च भवति इति सहृदयहृदयरप्रमाणसिद्धं वचोऽनुभवो वा। मन्ये इदमेव कारणं कवेः रमाकान्तशुक्लस्य राष्ट्रियभावनायाः राष्ट्रचेतनायाः कवितायाः निर्माणस्य वर्तते। यद्यपि रमाकान्तशुक्लस्य काव्ये बहुविधा वर्णा बहुविधा रसाश्च वर्तन्ते तथापि स वीररसस्य राष्ट्रचेतनायाः च कविताकरणेन परां प्रसिद्धिं प्राप्नोदिति नास्ति अविदितं विदुषाम्। यथा भवभूतिर्विविधान् रसान् वर्णयित्वाऽपि 'कारुण्यं भवभूतिरेव तनुते' इति रूपेण प्रसिद्धिं यातः तथा रमाकान्तशुक्लो वीररसेन राष्ट्रभक्तिस्वरात्मकेन काव्येन। कविवरस्य रमाकान्तशुक्लस्य वीररससम्बद्धं राष्ट्रस्वरं च वीक्ष्य कविवरोऽभिराजराजेन्द्रमिश्रः तं वाग्वधूट्याः अर्थात् सरस्वत्याः रोषत्वेन उत्प्रेक्षते यथा-

**प्रागल्भ्यं काश्यपोऽस्याः प्रणतिपरिमितो बच्चुलालोऽपि मानः**
**कारुण्यं श्रीनिवासः स्मितचटुलकलाभास्करो वल्लभोऽङ्कः।**
**रोषः कान्तो रमाया निभृतरसकथा दीक्षितव्यूढपुष्पा**
**लावण्यञ्चाभिराजो जयति नवनवा संस्कृता वाग्वधूटी[3]॥**

अत्राभिराजेन भगवत्याः सरस्वत्याः अर्थाद् वाग्वधूट्या रोषो रमाकान्तशुक्लः स्वकवितावैशिष्ट्येन वर्तत इति उत्प्रेक्षितम्। रमाकान्तशुक्लस्य देशोपद्रवान् राष्ट्रविघातकान् वा प्रति रोष एव तं राष्ट्रोपरि लेखितुं प्रेरयति, इत्थं राष्ट्रपरककवितारचनया कविवरो रमाकान्तशुक्लो रामधारीसिंहदिनकर इव प्रतिभाति। मन्मते तु ससंस्कृतराष्ट्रकविः। अमुमेव भावमहं क्वचित् स्वकवितायामित्थं प्रकटयामि-

**यो राष्ट्रकविरिह संस्कृते दिनकर इवाभूत् स्वैर्गुणैः।**
**लोकात् प्रवचसामनुचरस्स गतो रमाकान्तः कविः[4]॥**

कविवरो रमाकान्तशुक्लो 'भारतजनताहम्' इति शीर्षकसंवलिते काव्ये भारतीयजनतायाः स्वरूपं प्रतिपादयति तत्र पद्यस्य प्रारम्भे अर्थात् पूर्वार्द्धे जनतायाः स्वरूपं मृदुरूपेण प्रतिपादयति पश्चात् कठिनतया मृदुतया चोभयरूपेण-

**अभिमानधना विनयोपेता शालीना भारतजनताहम्।**
**कुलिशादपि कठिना कुसुमादपि सुकुमारा भारतजनताहम्[5]॥**

कविवरः शुक्लवर्य्यः क्वचिद् वैदिकराष्ट्रभावनाम् 'यत्र विश्वं भवत्येकनीडम्'किञ्च' मित्रस्य चक्षुषा समीक्षामहे' अनुसृत्य अनुवाद्य वा तदर्थविस्तारमपि विदधाति-

**निवसामि समस्ते संसारे मन्ये च कुटुम्बं वसुन्धराम्।**
**प्रेयः श्रेयश्च चिनोम्युभयं सुविवेका भारतजनताहम्[6]॥**

अत्र 'यत्र विश्वं भवत्येकनीडम्' इत्यनुसारं कविः समग्रं विश्वं परिवारत्वेन उत्प्रेक्ष्य भारतीयजनानां विदेशान् वैदेशिकान् जनान् वा प्रति पारस्परिकं प्रेयोवितरणे श्रेयोवितरणे महिमानं वितनुते।

शुक्लवर्य्यः प्राक्तनीं भारतीयां पद्धतिं परम्परां वा प्रति महतीमास्थां निदधाति, किञ्च भारतीयसभ्यतायाः 'अतिथिदेवो भव' इतिरूपायाः कारणेनैव देशस्य देशान्तराद् वैशिष्ट्यमपि सम्यग् जानाति। अत एव कविः वेदमूलायाः भावनायाः प्रस्तुतिमाधुनिके काले विधाय तन्माध्यमेन भारतीयजनान् विशेषतो नवयुवकान् प्रति प्रबोधनमपि विधत्ते-

**उत्सवप्रियाहं श्रमप्रिया पदयात्रा-देशाटन-प्रिया।**
**लोकक्रीडासक्ता वर्धेऽतिथिदेवा भारतजनताऽहम्[7]॥**

अस्माकं परम्परा सुखेषु दुःखेषु च समस्थितितया स्थातुं वर्तते। किन्तु प्रायेण इदानीन्तनाः जनाः सुखेषु अत्युत्साहवन्तो दुःखेषु च अतिदुःखिताअतिक्लेशिता वा भवन्ति, एतान् जनान् कविः स्वौजसा वाण्या स्वराष्ट्रगौरवं प्राचीनव्यवहारपद्धतिं च संस्मार्य तेषु उत्साहभावं भरति-

**कल्पनातीतदुःखानां वा सौख्यानां वापि पराः काष्ठाः।**
**समभावतया सोढुं शक्ताः समबुद्धिर्भारतजनताहम्[8]॥**
**दम्भोलिसन्निभा अपि विपदोऽनायासमेव सर्वा हि सहे।**
**विषपानपरापि स्मितवदना सर्वंसहभारतजनताहम्[9]॥**

कविः प्राचीनजीवनशैल्यामतीव श्रद्धावान् वर्तते वस्तुतःप्राचीनजीवनपद्धत्यैव अस्माकं विश्वगुरुत्वं श्रेष्ठपदत्वं वा विश्वे अभिराजति, अतः कविः स्वराष्ट्रवैशिष्ट्यं साभिमानं स्फोरयते-

**आयातु यातु लक्ष्मीः स्तुवन्तु निन्दन्तु नीतिनिपुणाः कामम्।**
**उच्चावचमार्गे गच्छन्ती सोत्साहा भारतजनताहम्10॥**

एवमेव कविर्जनान् एकसूत्रे स्थापयितुं प्रेरयति। भारतीयो जनो भेदभावं विनैव सर्वेषु विश्वासतया मैत्रीं स्थापयति, इदं हि मैत्रीकरणं भारतस्य सहजा प्रकृतिः न च दुर्बलता, कविरत्र हि मित्रस्य चक्षुषापि संसारं द्रष्टुं कामयते-

**मैत्री मे सहजा प्रकृतिरस्ति नो दुर्बलतायाः पर्यायः।**
**मित्रस्य चक्षुषा संसारं पश्यन्ती भारतजनताहम्[11]॥**

भारतराष्ट्रं मैत्रीस्थापने कामं स्वभावतः अग्रे वर्तते किन्तु एतस्मात् मैत्रीस्थापनकारणात् तत् दुर्बलं नास्ति प्रत्युत बलवत् वर्तते। ऋजुतया मैत्रीस्थापनेन च वैदिशिकाः स्वराष्ट्रं दुर्बलं न मन्येरन् एतदर्थं कविः तान् साटोपं सगर्वं स्वकीयां राष्ट्रियां भावनां परिचाययति-

**आक्रमणं नैव करोमि कदाप्याक्रमणं नैव कदापि सहे।**
**आर्जवं न मे मूर्खत्वमस्ति दृढकवचा भारतजनताहम्[12]॥**

कविः देशो वा स्याद् विदेशो वा स्यात् सर्वत्र वाणीस्वातन्त्र्यं कामयते सः कस्यचिदपि पुंसः किञ्च स्वदेशस्य जिह्वायाम् अर्गलां न कामयते, एतदर्थं स विश्वमञ्चे राष्ट्रभावनामित्थं प्रकटयति-

**जिह्वां मे कीलयितुं शक्तः कः कोऽत्र जगति मातुर्जातः।**
**वाणी विहरति मे सदोज्ज्वला गर्जन्ती भारतजनताहम्[13]॥**

कविः विश्वं प्रबोधयति यद् भारतं स्वमुग्धतया मूर्खं नास्ति प्रत्युत तत् 'शठे शाठ्यं समाचरेत्' इति पाठमपि सम्यक् जानाति, भारतराष्ट्रं तदीयमुग्धतया कोऽपि देशः प्रवञ्चयितुं न शक्नोति। अमुमेव भावं हिन्दीभाषायाः प्रसिद्धायाः 'घड़ियाली आँसू बहाना' इति लोकोक्तेः प्रयोगेण कविः इत्थं प्रस्तौति-

**नक्राश्रुजलं जाने सम्यक् जाने च गृध्रगोमायुगिरम्।**
**जाने करटक-दमनक-चरितं हृदयज्ञा भारतजनताहम्[14]॥**
**मुग्धा त्वहमस्मि परं दृप्तान् लेहयामि धूलिं निजौजसा।**
**जनतन्त्रपद्धतेर्गुडाकेश-गोप्त्री खलु भारतजनताहम्[15]॥**

कविः भारतस्य अभिज्ञानं वैदिकमूल्यजीवनमेव तथा च प्राक्तनीं व्यवहारपद्धतिमेव मन्यते, किन्तु अधुना राष्ट्रे अनेके तस्कराः, हिंसकाः, गेहभेदिनः, बलात्कारिणः, असभ्यताव्यवहारिणः च सन्ति, तेषाम् अवाञ्छिततत्त्वानां कारणेन राष्ट्रस्य ध्वजो यदा कदा लज्जितो जायते, अतः कविः स्वराष्ट्रस्य अभिज्ञानाय सर्वविधं सदाचरणमेव मूलत्वेन मन्यमानो विश्वं प्रबोधयति-

**तस्करा हिंसका गेहभिदो मूढाश्च सन्तु मयि यदा कदा।**
**ते किन्तु नैव परिभाषा मे समुदारा भारतजनताहम्[16]॥**

कविवरो रमाकान्तशुक्लो वस्तुतो राष्ट्रकविः, तस्य धमनिषु राष्ट्रासक्तो रक्तः प्रवहति, कविमनसि राष्ट्रं साक्षाद् देव एव। स स्वोद्गारेण स्वाचरणेन च राष्ट्रियान् जनानित्थमुपदिशति-

**भारतं वर्तते मे परं सम्बलं भारतं नित्यमेव स्मरामि प्रियम्।**
**भारतेनास्ति मे जीवनं जीवनं भारतायार्पितं मेऽखिलं चेष्टितम्॥**
**भारताद् भाति मे भूतलं भूतलं भारतस्य प्रतिष्ठास्ति मे मानसे।**
**भारतेऽहं प्रपश्यामि विश्वेश्वरं भारत! क्षोणिशृङ्गार तुभ्यं नमः[17]॥**

अद्यत्वे जातिधर्माधारेण जनः परस्परं विभक्तो वर्तते, किन्तु नेदं कवेरभीष्टम्। कविः शुक्लवर्यो भारतराष्ट्रस्य सौन्दर्यं सर्वधर्मसमुदायेन मनुते स सर्वधर्मसमुदायस्य प्रबलः समर्थकः पक्षधरो वा प्रतीयते यथा-

**शंप्रदं शंकरं माधवं राघवं पार्वतीं राधिकां जानकीं च स्तुवत्।**
**विट्ठलं बुद्धदेवं च जिनं स्मरद् भूतले भाति मेऽनातरं भारतम्18॥**

कविवरस्य रमाकान्तशुक्लस्य दृशा राष्ट्रयशोवर्धने यः कोऽपि स्यात् स सर्वथा समादरणीय एव। कविः शुक्लवर्यः रामचरितमानसं कबीर-बीजकं सुरसागरं समानरूपेण एककोटिकमेव परिगणयति यशोवर्धनत्वात्-

शेषभागःषष्ट्मपुटे

# 'भारतीयतायाः आधारः संस्कृतमस्ति-प्रो रमाकान्तपाण्डेयः'

## ( संस्कृतमास-महोत्सवस्य उद्घाटन समारोहः शोभायात्रा च )

केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे 29-08-2023 तमे दिनाङ्के मासव्यापिनः संस्कृतमहोत्सवस्य शुभारम्भः अभवत्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलगुरुः प्रो. श्रीनिवासवरखेडीवर्याणां सरक्षणे समायोज्यमाने कार्यक्रमस्य उद्घाटनावसरे मुख्यातिथिः महर्षि-पतञ्जलिसंस्कृतसंस्थानस्य भोपालस्य अध्यक्षः श्रीमान् भरत-बैरागी विशिष्टातिथिः केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरस्य शिक्षाशास्त्रविद्याशाखायाः आचार्यः प्रो. वाद एस् रमेशः एवञ्च अध्यक्षः केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य निदेशकः प्रो. रमाकान्तपाण्डेयः उपस्थिताः आसन्।




उद्घाटनसत्रस्य आध्यक्ष्यं निर्वहन् भोपालपरिसरस्य निदेशकः प्रो. रमाकान्तपाण्डेयः उक्तवान् यत् भारतीयतायाः आधारः संस्कृतमस्ति। युवानः छात्राः संस्कृतेनैव व्यवहरन्तु। समाजं परस्परं योजयितुं संस्कृतभाषा आवश्यकी अस्ति। वर्तमानपरिप्रेक्ष्ये भारतीयज्ञान-परम्परा नवाचारेण सह मानवस्य विकासस्य हेतुः भवितुं शक्नोति। संस्कृतज्ञाः शास्त्रेषु निहितज्ञानतत्त्वं समाजे प्रसारयन्तु।

सत्रेऽस्मिन् भोपालस्थितस्य पतञ्जलिसंस्कृतसंस्थानस्य अध्यक्षः कार्यक्रमस्य मुख्यातिथिश्च अवदत् यत् अयं कालः संस्कृतस्य अमृतकालः वर्तते । केन्द्रसर्वकारेण सह राज्यसर्वकारः अपि संस्कृतस्य कृते भारतीयज्ञानपरम्परायाः कृते च कार्यं कुर्वन् अस्ति । वयं सर्वे संकल्पं स्वीकुर्वन्तु यत् मासं यावत् संस्कृतमेव जीवामः। जीवनस्य प्रतिक्षणं संस्कृतक्षणं भवतु। संस्कृतछात्राः शास्त्रं पठित्वा विषयविशेषज्ञाः भवन्तु। वयं सर्वे चाणक्यं भूत्वा संस्कृतराष्ट्रस्य निर्माणं कर्तुमर्हन्ति।

विशिष्टातिथिः प्रो. वादएस् रमेशः उक्तवान् यत् राष्ट्रियशिक्षानीतेः 2020 इत्यत्र संस्कृतस्य संस्कृतशिक्षकाणामपि उत्तरदायित्वं वर्तते। रमेशमहोदयेन नीतेः चतुर्विधाधाराः १) जिज्ञासा, २) अन्वेषणम्, ३) चर्चा ४) विश्लेषणम् इत्येवं प्रकारकाः निर्दिष्टाः। शिक्षकाणां कृते अपि पञ्चबिन्दवः १), गम्भीरचिन्तनम्, २) सर्जनात्मकता, ३) सहभागः, ४) जिज्ञासा, ५)सम्प्रेषणम् एवं रूपेण कथिताः। स्वागतभाषणं प्रो. सुबोधशर्मा, धन्यवादज्ञापनं प्रो. सोमनाथ साहुः, सञ्चालनञ्च डॉ. दातरामपाठकः श्रीप्रतापमहोदयः च कृतवन्तः।

अस्य संस्कृतमासमहोत्सवस्य अङ्गभूततया 01-9-2023 तमे दिनाङ्के परिसरस्य निदेशकेन सह सर्वैः छात्रैः अध्यापकैः कर्मचारिभिश्च जनसामान्ये संस्कृतं प्रति जागरूकतां चेतनां च आनेतुं संस्कृतशोभायात्रा बागसेवनियाक्षेत्रे निष्कासिता। यात्रायां संस्कृतसमुद्घोषाः, छात्राणां हस्तेषु संस्कृतभाषायां लिखिताः पट्टिकाः, विविधानि वाद्यानि च आसन् यात्रायाः संयोजकः प्रो. अशोककुमारकछवाहः आसीत्। यात्राप्रारम्भात् प्राक् परिसरस्य निदेशकः प्रो. रमाकान्तपाण्डेयः छात्रान् सम्बोधयन् आह यत् देशस्य यूनामुपरि संस्कृतसंस्कृतिगौरवात्मसम्मानानां च भारः वर्तते। राष्ट्रमुन्नतिपथे कर्तुं युवानः एव समर्थाः सन्ति। वयं मिलित्वा संस्कृतस्य राष्ट्रस्य च सेवां कुर्मः।

# संस्कृतसप्ताहमहोत्सवस्य समापन समारोहः

-चंद्रकांतदत्तशुक्ल

स्वतन्त्रतासंग्रामसेनानी विश्रामसिंहराजकीयस्नात-कोत्तरमहाविद्यालयचुनारमिर्जापुरस्य संस्कृतविभागेन आयोजितस्य संस्कृतसप्ताहमहोत्सवस्य समापन समारोहस्य समाप्तिः प्रसारव्याख्यानेन, संस्कृतगीतप्रतियोगितया च समाप्तवती। समापन समारोहस्य आरम्भः महाविद्यालयस्य प्राचार्यः डॉ. प्रदीपनारायण डोंगरे इत्यनेन माता सरस्वती इत्यस्याः प्रतिमायाः मालाकरणेन, पूजनेन च अभवत् । सर्वप्रथमं किरणपालः शिखातिवारी च स्वगीतेन माँ सरस्वत्याः पूजां कृतवन्तौ । तदनन्तरं महाविद्यालयस्य छात्राः साइबा रञ्जना, रुचिः च कुलगीतं प्रस्तौति स्म तथा च स्वागतगीतं प्रीतियादवः, सुमनयादवः प्रतिक्षा यादवः च प्रस्तुतवन्तः। अस्मिन् अवसरे संस्कृतसप्ताहस्य महोत्सवकार्यक्रमस्य संयोजकः डॉ. प्रभातकुमारसिंहः स्वागतभाषणं कुर्वन् संस्कृतसप्ताहमहोत्सवस्य विषयान्तरेण अवदत् यत् संस्कृतसप्ताहमहोत्सवकार्यक्रमे संस्कृतगोष्ठी, संस्कृतनिबन्ध प्रतियोगिता, संस्कृतश्लोकपाठः च भविष्यति प्रतियोगिता, संस्कृतसामान्यज्ञानप्रश्नोत्तरप्रतियोगिता तथा संस्कृतदिवसस्य अवसरे प्रसारव्याख्यानानि, संस्कृतगीतप्रतियोगिता च आयोजिता। संस्कृतं समाजं च विषये प्रसारव्याख्यानस्य मुख्यवक्ता IQAC प्रभारी प्राध्यापिका माधवी शुक्लः अवदत् यत् संस्कृतं केवलं भाषा नास्ति, साहित्यं न, अपितु संस्कृतं संस्कृतिः एव। संस्कृतिं अवगन्तुं संस्कृतस्य अध्ययनं आवश्यकम्। प्राचीनकाले एषा शासनभाषा आसीत् । क्रमेण लोकभाषारूपं प्राप्तम्। गुप्तकालपर्यन्तं विद्वान्भाषा इति सीमितं जातम्। अद्य पुनः संस्कृतं सार्वजनिकभाषारूपेण करणं अस्माकं सर्वेषां दायित्वम् अस्ति। कार्यक्रमस्य अध्यक्षतां कुर्वन् महाविद्यालयस्य प्राचार्यः डॉ. पी.एन. संस्कृतस्य अध्यात्मत्वं मनुष्याणां हिताय भवति। एतादृशानां कार्यक्रमानां माध्यमेन छात्राणां शिक्षकानां च तादात्म्यं बन्धनं च विशेषं भवति । अतः महाविद्यालये नियमितरूपेण एतादृशानां कार्यक्रमानां आयोजनं करणीयम्। निबन्धप्रतियोगितायां बीएद्वितीय सत्रस्य साहिबा बानो प्रथमस्थानं, आकांक्षयादवः द्वितीयस्थानं, पूजा प्रजापतिः तृतीयस्थानं प्राप्तवती। संस्कृतप्रश्नोत्तरप्रतियोगितायां एम.ए.द्वितीयसेमेस्टरस्य छात्रा शिखा तिवारी प्रथमस्थानं, बीए द्वितीयसत्रस्य प्रतीक्षायादवः द्वितीयं स्थानं, रूबीकुमारी तृतीयस्थानं प्राप्तवती। संस्कृतश्लोकपाठप्रतियोगितायां बीए चतुर्थसत्रस्य प्रतीक्षायादवः प्रथमः, किरणपालः पूजाप्रजापतिः च संयुक्तरूपेण द्वितीयः, बीए प्रथमसत्रस्य स्वातिवर्मा तृतीयस्थानं प्राप्तवन्तः। संस्कृतगीतप्रतियोगितायां बीए द्वितीयसत्रस्य साहिबा बानो प्रथमः, चतुर्थसत्रस्य प्रतीक्षायादवः द्वितीयः, प्रीतियादवः, एम.ए.द्वितीयसत्रस्य शिखा तिवारी च संयुक्तरूपेण तृतीयस्थानं प्राप्तवन्तः। कार्यक्रमस्य सन्चालनं अर्थशास्त्रविभागस्य प्रभारी डॉ. शेफालिकारायेन च धन्यवादः बी.एड विभागस्य डॉ. दीपकसिंहेन निर्वाहितम् । अस्मिन् अवसरे डॉ. राजेश कुमार दुबे, डॉ. कुसुम लता, डॉ. नलिनी सिंह, डॉ. रीता मिश्रा, डॉ. शिखा तिवारी, डॉ. वकार राजा, डॉ. लता, डॉ. अदिति सिंह, डॉ. सत्येन्द्र कुमार गुप्ता, डॉ. अवधेश कुमार सिंह यादवः, कुर्बन अली, पारसः संतोषः इत्यादयः उपस्थिताः आसन्।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरे संस्कृतसंभाषणशिविरस्य उद्घाटनसमारोहः

-प्रवेशकुमारशुक्लः

लखनऊ। केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरे शिक्षाशास्त्रविद्याशाखायां लोकभाषा- प्रचारसमितिः एवं केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरः इत्यनयोः मिलितानुतुल्येन



दशदिवसात्मकसंस्कृतसंभाषणशिविरस्य उद्घाटनसमारोहः आयोजितः। शिक्षाशास्त्रविद्याशाखायाः शाखाध्यक्षायाः आचार्यायाः अवनीश अग्रवालमहोदयाया : आध्यक्षे सामारोहोऽयम् अनुष्ठितः। समारोहे अस्मिन् मुख्यातिथित्वेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरस्य व्याकरणविद्याशाखायाः आचार्यः प्रो० भारतभूषणत्रिपाठीवर्याः संस्कृतसंभाषणस्योपादेयता संदर्भे स्वविचारान् समुपस्थापितवन्तः। कार्यक्रमेऽस्मिन् शाखायाः आचार्याः प्रो० देवीप्रसाद द्विवेदीमहोदयाः, प्रो. बच्चाभारतीमहोदयाः . प्रो० गणेशशंकरविद्यार्थीमहोदयाः, डॉ. राधातिवारीमहोदयाश्च उपस्थिताः आसन् ।

संस्कृतसंम्भाषणशिविरस्य संचालकाः : विद्याशाखायाः सहायकाचार्याः : डॉ० रुद्रनारायणनरसिंहमिश्रमहोदयाः शिविरस्य उद्देश्यं लक्ष्यं च स्पष्टं कृतवन्तः। समारोहे अस्मिन् शिक्षाशास्त्रप्रथमवर्षीयाः सर्वे छात्राध्यापकाः छात्राध्यापिकाश्च प्रतिभागं कृतवन्तः। शिक्षाशास्त्रविद्याशाखायाः सहायकाचार्याः डॉ. हरिओमशर्मामहोदयाः कार्यक्रमस्यास्य संयोजकत्वेन सम्पूर्णां व्यवस्थां संचालितवन्तः।

# जनपदस्तरीयासु प्रतिस्पर्धासु संस्कृतमहाविद्यालयस्य छात्राः पुरस्कृताः

वार्ताप्रदाता- आचार्य-दीनदयाल-शुक्लः

उत्तरप्रदेशः/बाँदा-सितम्बरमासस्य ०९/०९/२०२३ तमे दिनाङ्के उत्तरप्रदेश संस्कृत संस्थानम् लखनऊ द्वारा श्रीवामदेवसंस्कृतमहाविद्यालयः बाँदाजनपदे संस्कृतसामान्यज्ञानस्य विविधाः जिलास्तरीयाः प्रतियोगिताः



आयोजिताः। यस्मिन् १५० तः अधिकाः संस्कृतछात्राः भागं गृहीतवन्तः । आसु प्रतियोगितासु मुख्यतया श्रीवामदेवसंस्कृतमहाविद्यालयः, संकटमोचन-संस्कृत-उच्च-माध्यमिक-विद्यालयः भुजरख, शासकीय-इण्टर-कॉलेज बबेरुः, आर्यकन्या-इण्टर-कॉलेज बांदा डी.ए.वी इण्टर कॉलेज बांदा, पंडित-जवाहरलालनेहरू इण्टरमीडिए-कॉलेज-गिरवाँ, सरस्वती-विद्या-मन्दिर-बांदा, राजकीय-महिला-महाविद्यालयसहितं केचन् विद्यालयाः महाविद्यालयाः च भागं गृहीतवन्तः। सर्वेषां विद्यालयानां छात्राः उत्तमं प्रदर्शनं कृतवन्तः। यस्य विवरणं यथा- पुस्तकशब्दप्रतियोगितायां ज्योतिः प्रथमस्थानं, महेशः द्वितीयं, नेहासिंहं तृतीयस्थानं प्राप्तवान् ।अपि च संस्कृतगीते प्रज्ञा-द्वितीयं स्थानम् संस्कृत सामान्यगीतप्रतियोगिता-२. ज्योति नेहा च संयुक्तरूपेण प्रथमस्थानं प्राप्तवन्तौ।त्रयोऽपि स्पर्धासु उत्तमं प्रदर्शनं कृत्वा सर्वेषां छात्राणां पुरस्कारैः प्रमाणपत्रैः च अभिनन्दितम्।प्रतियोगितासमये मुख्यातिथित्वेन पूर्वसैन्याधिकारिः श्रीराजेन्द्रसिंहवर्यः समुपस्थितोऽभवत्। अथ च जनपदस्य जिलाविद्यालयनिरीक्षकः श्रीविजयपालसिंहः विशिष्टातिथित्वेन साक्षिभूतोऽभवत् । सहैव वामदेवसंस्कृतविद्यालयस्य प्राचार्यः डॉ. अशोककुमार अवस्थी समुपस्थितः आसीत्। निर्णायकत्वेन राष्ट्रपतिसम्मानप्राप्तः प्रथितयशः श्रीराजकुमारवर्यः तथा संस्कृतमहाविद्यालयः साथी इत्यस्य पूर्वप्रधानाचार्यः श्रीरमेशद्विवेदी, मन्नूलाल-संस्कृत-महाविद्यालयस्य प्रधनाचार्यः श्रीशिवनारायणत्रिवेदी, अखण्ड-इण्टरकालेज-कबरई इत्यस्य पूर्वप्राचार्यः श्रीगयाप्रसादत्रिपाठिना सहभागः कृतः। अवसरेऽस्मिन् महाविद्यालयस्याचार्येषु अभयपाण्डेयः, श्रीसूरजबलीगुप्तः एवं प्रतियोगितायाः संयोजकः आचार्यरामभवनतिवारी, सहैव विद्यालयस्य शिक्षकः एवं प्रवक्ता श्रीशिवपूजनत्रिपाठिसहितं विभिन्न विद्यालयानां शिक्षकाः प्रेक्षकाः, छात्राश्चोपस्थिताभवन् संयोजकः अवदत् यत् शीघ्रमेव सर्वेषां कृते विभागस्तरीयप्रतियोगितानां आयोजनं भविष्यति, यस्याः तिथिः पश्चात् निर्धारिता भविष्यति।

# चन्द्रयानम् - ३ चतुर्दशी



प्रणेता©
प्रो. ताराशंकरशर्मा पाण्डेयः

## विज्ञानपादो विधौ

मातू रूपतुलाधिरोहणपरस्-तन्मातुलो मातुलो
यो मामा कथितः सदैव शिशुभिर्-हर्षास्पदैस्तालिकैः।
बालो गन्तुमना कलानिधितलं स्वप्नञ्च संकल्पते
काले सैष युवा पदं प्रकुरुते विज्ञानपादो विधौ।। 1 ।।

क्षेत्रे वैज्ञानिकेऽथो खगतभगणने सांख्यकीये च यन्त्रे
राष्ट्रीये चान्द्रयाने प्रकृतिविरचिता नैपुणी भारतीयैः।
तन्मेधां भारतीयां विविधगतिमतीं वीक्ष्य वैज्ञानिकाश्च
विज्ञा मुग्धाः समस्ता वदनदशनगामङ्गुलीञ्चर्वयन्ति ।।2।।

चान्द्रे याने द्वितीये व्यपगतगतिको विक्रमो विक्रमोऽभूच्
चिन्ता नैवं विधेयाऽप्रतिहतपदका स्याम नद्धा सदैव।
पौनःपुन्येन काले प्रभवतु प्रहितं चान्द्रयानं तृतीयं
भूयो भूयो भवामः शशितलपदका विक्रमा विक्रमेण।। 3 ।।

अस्मद्भारतदेशविज्ञप्रमुखः त्वं सोमनाथाभिधो
किञ्चित्कर्म कुरुष्व चन्द्रवहनं गच्छेद् ध्रुवे दक्षिणे।
श्रुत्वा शासनगूढवाक्यनिहितं वैज्ञानिकैस्तत्परैः
सिद्धन्तैरयि चन्द्रयानमपरं प्रक्षेपितं दक्षिणे।। 4।।

रे रे मातुल चन्द्र! आगतमहं प्रज्ञानसंज्ञाकृतं
यास्ते श्रीः पृथिवी तवास्ति भगिनी मातास्ति मे भारती।
रक्षासूत्रमहं तयाक्षिप्रहितं प्राणीतवत् संस्कृतं
सप्ताहद्वयमत्र विक्रमचरं वासं करिष्ये मुदा।। 5।।

भ्रातश्चन्द्र! मनोरथो बहुतिथः स्वप्ने च संपालितः
तस्माद्विक्रमकुंकुमोच्छ्रितवरं शुभ्रञ्च चक्रान्वितम् ।
भाले प्रीतिहरिन्मनोभिलषितं प्रज्ञानकं भारतं
जातं ते रुचिरं त्रिरंगतिलकं प्राथम्यसंशोभितम् ।। 6।।

धातः! भारत! चन्द्रयानमहमे प्राप्तो हिमांशोर्भुवि
प्रातःकालमनोहरात्र धरणी चंक्रम्यमाणोस्मि भोः।
सद्यः संग्रहतत्परः शुचितयाऽऽ-कृष्टा च चित्रावली
सातत्येन सदाऽऽहितां सखिवर! स्वीकृत्य तां रक्षतात।। 7 ।।

जातोहं जलधेः शशीति सलिलाऽऽ-पूर्णा मदीया धरा
तीव्रांशोः किरणैर्निरन्तरमये! वाष्पीभवन्मे जलम्।
तस्मादार्द्रतया ध्रुवे जलचयः संभाव्यते दक्षिणे
निर्द्वन्द्वं मयि चन्द्रयान विचर प्रज्ञान! पीतामृत ।।8।।

चन्द्रे यत्र पदं न्यधात् सकुशलं निःश्रेयसो विक्रमः
तत्सिद्धं शिवशक्तिनाम प्रथितं भूयाच्च सोमास्पदम्।
गौरीशम्भुहिमांशुसंगमतलं निःश्रेयसायास्तु नः
पश्यन्ती विलसेत् सुखं त्रिजगती ब्रह्माण्डभाण्डोज्ज्वला।।9 ।।

चञ्चच्चान्द्रतले पदं विनिदधत् प्रज्ञानयानं लघु
हाईड्रोजनप्राणवायुमिलनं संसूचयद् विज्ञवत् ।
तेनोत्का इसरोमहासुमतयः सौरान्तरीक्षेक्षणा
अस्मद्राष्ट्रमिदं जयेद्गुरुतया विज्ञानज्ञानोदयम्।। 10।।

प्रत्यक्षं गहनं विलोकय विलं संज्ञानचक्षुः क्व ते
ज्येष्ठानामनुदेशपालनपर ! प्रज्ञान! प्रत्येहि भोः! ।
आज्ञामाप्य सहोदरस्य शिशुवत् प्रत्यागतं विक्रमा-
दित्युत्फुल्लमना विभास्वदिसरो-वैज्ञानिका आह्वषन्।। 11।।

रे रे विक्रम मित्र चन्द्रसदनं किं वेपमानं वपुः
प्रज्ञान! स्थिरतामुपेहि बिभितान्नो कर्म शिष्टं बहु।
सन्नद्धो भव नूत्नशोधनरतो सन्देशनिर्देशको
येनान्वर्थधराभिधेयनियतः प्रज्ञानबोध्यो जयेः।।12।।

उत्तिष्ठ प्रक्रम त्रिविक्रम इव प्रक्षिप्तपद्विक्रम!
किञ्चिद्याहि यतः समे प्रमुदिता वैज्ञानिका भारते।
अन्यत्राङ्गदवन्निधेहि चरणं श्रुत्वा निधत्ते पदं
तद्विज्ञा इसरोप्रधानसहिता लक्ष्यं सरेयुर्नवम्।।13 ।।

श्रोतारो मम भारतीयजनकाः! सप्ताहयुग्मे गते
सद्यो जागरितास्मि भानुकिरणै र्निर्देशसंज्ञापितम्।
प्रज्ञानं पुनरप्यहं प्रियकरं सन्देशसंप्रेषिता
निश्चिन्ता परकर्मलग्नमनसः कुर्वन्तु किञ्चिन्नवम् ।। 14।।

इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित- प्रतिनवबाणभट्ट- पण्डित-श्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्लाजीवैदिक-विश्वविद्यालय-कुलपतिना प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं "चन्द्रयानम् - 3 चतुर्दशी" नामकाव्यं सम्पूर्णम्।

# स्मरणेनैव कृष्णस्य जीवनं वै प्रकाशितम्



प्रो. बनमाली बिश्वालः

सर्वे वदन्ति 'कृष्णो में' नैकस्य सकलस्य यः।
एकस्य चेद् भवेत्कृष्णः कृष्णस्य कृष्णता कुतः ।।
सुदामस्यापि कृष्णोऽस्ति कृष्णो पाण्डववान्धवः।
अर्जुनस्य सखा कृष्णो द्रौपद्याश्च सखा प्रियः।।
यथा राधा तथा मीरा सत्यभामाऽथ रुक्मिणी ।
गोपांगनासु कृष्णस्य समप्रीतिः प्रसिद्ध्यति ।।
स च कृष्णोऽस्ति देवक्या स एव यशोदासुतः।
दायादो यदुवंशस्य कृष्णोऽपि द्वारकानृपः ।।
जगद्घुरुश्च कृष्णोऽस्ति स एव लोकशिक्षकः।
माध्यमेनार्जुनस्यैव शिक्षितस्सर्वमानवः ।।
कर्तु निरन्तरं कर्म यत् प्रेरयति मानवान्।
कृष्णतत्त्वं तदेवास्ति कृष्णभक्तश्च कर्मकृत् ।।
सर्वकर्मफलान्येव कृष्णार्पितानि चेद्वरम्।
मूलं च जीवनस्यास्ति कृष्णार्पणं न संशयः ।।
बहूनि कृष्णजन्मानि जगदुद्धारहेतवे।
जगन्नाथस्वरूपेऽद्य कृष्णलीला महीयते।।
संसारबीजरूपाय विराटपुरुषाय वै।
कृष्णाय बालकृष्णाय कृष्णतत्त्वाय धीमहि ।।
वन्दे तं परमात्मानं जीवात्मानं घटे घटे।
स्मरणेनैव कृष्णस्य जीवनं वै प्रकाशितम् ।।



# नन्दिता राष्ट्रमुख्येन शिक्षका राष्ट्ररक्षकाः

स्वातन्त्र्यमस्य राष्ट्रस्य रेखांकितं स्मृती भवेत्।
तदर्थ वर्षद्वयाच्च अमृताख्यो महोत्सवः ।।
वर्षद्वयाच्च राष्ट्रे नस्सर्वत्रामृतवर्षणम्।
उत्सवमुखरं राष्ट्रं भाति नैकप्रसंगतः।।
स्वतन्त्रतोत्सवो राष्ट्रे चन्द्रयानोत्सवः क्वचित्।
जीविंशति-प्रसंगेऽपि सज्जीभूतं हि भारतम्।।
प्रांगणं मन्दिराणां च नवीकृतं यथाविधि।
अन्त्रोद्यानोत्सवाश्चापि राष्ट्रपतेगृहे पुनः।।
यदासीन्मोगलोद्यानं राष्ट्रपतेगृहे पुरा।
अमृतोद्यानरूपेण तदद्य परिशोभते।।
भव्योद्यानेऽत्र राष्ट्रस्य समवेताञ्च शिक्षकाः।
नन्दिता राष्ट्रमुख्येन शिक्षका राष्ट्ररक्षकाः ।।
शिक्षकदिवसे नूनमुपहारोऽस्ति कश्चन।
सहर्षमकरोद् वार्ता शिक्षकैः राष्ट्रनायकः ।।
शिक्षकैर्यदि संवादो राष्ट्रपतेश्च जायते।
शिक्षा दीक्षा च राष्ट्रस्य स्थानमुच्चमवाप्स्यतः ।।
शिक्षकाणां महत्त्वं वै राष्ट्रे सर्वोपरि मतम्।
भाविनां नागरिकाणां निर्माणं क्रियते च यैः ।।
शिक्षकाणां प्रयासेन राष्ट्रं प्रगतिमाप्नुयात्।
तेषु च यदि शैथिल्यं प्रगतिः शिथिलायते।।

# शिक्षकाणां जयो लोके छात्राणां विजये पुनः

शिक्षणं वक-काकेभ्यो शुनकाद् गर्दभादपि।
शिक्षणमपि राष्ट्रे नो बालादपि शुकादपि।।
गुरवश्शिक्षकाश्चात्र सन्त्याचार्याश्च शिक्षकाः।
गुर्वर्थक-पदानां च स्वारस्यमत्र भिद्यते।।
नाशयति तमोज्ञानं गुरुरित्यभिधीयते।
आचारान् शिक्षयित्वोत्र सन्त्याचार्याश्च सज्जनाः।।
धर्मार्थ-काम-मोक्षाणां साधकाश्शिक्षकाश्च ते।
गुरुकृपां विना कस्य पुरुषार्थचतुष्टयम्।।
शिक्षणं यदि साक्षान्न गुरुत्वं नैव हीयते।
एकलव्य-प्रसंगोत्र दृष्टांतोद्वितीयो मतः।।
आचारैः व्यवहारैश्च सततं शिक्षयेद्गुरुः।
ज्ञानं यत् पुस्तकस्थं तत् शिक्ष्यते नैकसाधनैः।।
शिक्षकः पक्षपाती चेत् छात्रहितं सुदुर्लभम्।
छात्रहितरतानां च लोकयोस्सद्गतिर्मता।।
छत्रवदत्र छात्रश्चेद् दोषाच्छादनतत्परः।
अहेतुकी कृपा तस्मिन् गुरोस्संजायते स्वतः।।
सर्वे च शिक्षका लोके विद्यार्थिनस्समे क्वचित्।
स्थान-काल-प्रसंगेषु भूमिका भिद्यते यतः।।
शिक्षकदिवसस्याद्य नैकाश्च शुभकामनाः।
शिक्षकाणां जयो लोके छात्राणां विजये पुनः।।

चतुर्थपुटस्य शेषभागः

# पद्मश्रीरमाकान्तशुक्लकाव्येषु...

**योगवासिष्ठगीतामहाभारतैर्ग्रन्थरत्नैश्च तैस्तैः प्रबुद्धं तथा।**
**मानसं बीजकं सूरसिन्धुं दधद् भूतले भाति मेऽनारतं भारतम्[19]।।**

कविः राष्ट्रस्य न्यासं प्रति बद्धादरो भूत्वा लोकानपि बद्धादरान् कर्तुं प्रेरयति। वस्तुतः पूर्वजान् प्रति समादरभावः अस्माकं परिपाटी, तेषां भावनायाः रक्षणं प्रचारणं च अस्माकं राष्ट्रिया भावना किञ्च कर्तव्यमपि, कविः अमुमेव सन्देशं प्रददाति लोकान्-

**विक्रमादित्यवेतालगाथाङ्किते मालवे रेजतुर्यस्य लोकश्रुते।**
**भर्तृपूर्वो हरिश्चाथ सान्दीपनिर्भूतले भाति तन्मामकं भारतम्[20]।।**

कविः देशस्य रक्षाकृते स्वतन्त्रताकृते वा सर्वानेव हुतप्राणान् स्मरति। तस्य मनसि हिन्दुर्वा मुस्लिमो वेति भेदभावो नास्ति। यः कोऽपि स्यात् देशहितकृते रतो मृतो वा स सर्वतः प्रणम्य एव। स देशकृते अमरत्वं गतम् अब्दुलहमीदमित्थं स्मरति कविताmाध्यमेन च लोकान् स्मारयति-

**घर्धरस्वानपूर्वं पुरः प्रस्थितान् शत्रुटैङ्कान् करीन्द्रानिव ध्वंसयन्।**
**श्रीहमीदो बभौ केसरी यत्र तद् भूतले भाति मेऽनातरं भारतम्[21]।।**

भारतस्य भव्यमुदात्तं च स्वरूपं तदीयशाश्वतमूल्यनैव चकास्ति, इदमेव वस्तुत आध्यात्मिकं रहस्यम्। कविः पापपुण्ययोः फलमपि लोकान् निर्दिशति, जनः पुण्येन वर्धते पापेन च स्वयमेव हिंस्यते, सत्येन सर्वत्र जयः, असत्येन च पराजयः, इत्येव अस्माकं भावना, यथा-

**यत्र हिस्त्रः स्वपापैः स्वयं हिंस्यते यत्र साधुः समत्वाद्भयान्मुच्यते।**
**यत्र सत्यं जयं याति नैवानृतं भूतले भाति तन्मामकं भारतम्[22]।।**
**यत्र नास्त्यङ्कुशो वाचि कस्यापि वै यत्र नास्त्यङ्कुशो मानसे कस्यचित्।**
**यत्र नास्त्यङ्कुशः कर्मणि क्ववापि वै भूतले भाति तन्मामकं भारतम्[23]।।**

कविः रमाकान्तशुक्लः 'अहं स्वतन्त्राता भणामि' इतिकविताशीर्षकमाध्यमेन स्वतन्त्रता किं किं वाञ्छति? तस्याः भावना का? इत्यस्यापि चित्रणं करोति-

**मदर्चनाकृते शिरांस्युपायनीकृतानि यैः**
**धनं वपुस्तथा मनः सहर्षमर्पितानि यैः।**
**अवापुरात्मवक्षसि ज्वलद्भुशुण्डिगोलिकाः**
**गतास्त एव मे जनाः सदैव वन्दनीयताम्[24]।।**

प्रस्तुतपद्यमाध्यमेन स्वतन्त्रता कथयति यत् यैः मत्सेवाकृते सङ्ग्रामे शिरांसि उपायनीकृतानि, यैः मदर्थं धनं वपुः मनः च समर्पितं, यैः स्ववक्षसि ज्वलद्भुशुण्डिगोलिकाः सम्मुखीकृताः ते एव मम कृते वन्दनीयतां गता वर्तन्ते नान्यथा। उक्तकविताच्छलेन कविः कवित्वशुक्लो रमाकान्तशुक्लो मन्ये लोकान् प्रति राष्ट्रियां भावनामेव प्रस्फोरयते।

कस्यचिदपि देशस्य कृते तदीयराष्ट्रियभावना कीदृशी भवेदिति भावं स्वतन्त्रता स्वयमेव उत्त्थापयति, यथा-

**मया न कल्पितं कदापि दुर्बलाभिशोषणं**
**मया न कल्पितं कदापि दुर्जनाभिपोषणम्।**
**मया न कल्पितं कदापि सज्जनावमाननं**
**सहेऽखिलं च तद् यथा सहै न तद् विधीयताम्[25]।।**

इत्थं द्रष्टुं शक्यते यत् पद्मश्रियो रमाकान्तशुक्लस्य काव्ये सर्वत्र उदात्ताया लोककल्याणपराया राष्ट्रियभावनायाः विविधवर्णा स्थितिः वर्तते।

**पादटिप्पणयः**

1 विष्णुपुराणम्, 2,3,24 2 मनुस्मृतिः, द्वि.अ.श्लो.सं.20 3 श्रुतिम्भरा 4 लेखकविरचितम् 5 भारतजनताहम्, पृ.सं.33 6 भारतजनताहम्, पृ.सं.33 7 भारतजनताहम्, पृ.सं. 34 8 भारतजनताहम्, पृ.सं. 34 9 भारतजनताहम्, पृ.सं. 35 10 भारतजनताहम्, पृ.सं.36 11 भारतजनताहम्, पृ.सं. 36 12भारतजनताहम्, पृ.सं. 36 13 भारतजनताहम्, पृ.सं. 37 14 भारतजनताहम्, पृ.सं. 38 15 भारतजनताहम्, पृ.सं. 38 16 भारतजनताहम्, पृ.सं. 38 17 भाति मे भारतम् 18 भाति मे भारतम्, पृ.सं. 21 19 भाति मे भारतम्, पृ.सं. 26 20 भाति मे भारतम्, पृ.सं.56 21 भाति मे भारतम्, पृ.सं.73 22 भाति मे भारतम्, पृ.सं.75 23 भाति मे भारतम्, पृ.सं.87 24 भारतजनताहम्, पृ.सं.22 25 भारतजनताहम्, पृ.सं.23



# शिक्षकदिवसावसरे अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्य उद्घाटनम्

डॉ० महेशकुमारपारिकः

राजस्थानम् / जयपुरम् । केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली द्वारा सञ्चालितम् अनौपचारिकसंस्कृतशिक्षणयोजनान्तर्गतं जयपुरस्थ सञ्जयशिक्षकप्रशिक्षणमहाविद्यालये नूतनसत्रस्य शुभारम्भः शिक्षकदिवसावसरे संस्थाप्रमुखद्वारा दीपप्रज्वालनेनाभवत्। केन्द्रीय-संस्कृत-विश्वविद्यालयस्य तत्त्वावधानेन सञ्चालिते अनौपचारिक । कार्यक्रमस्य मुख्यातिथिः तथा महाविद्यालयस्य प्राचार्या डॉ०-सुनीताभार्गवमहोदया प्रोक्तवती यत् विकासस्य मूलमन्त्रः संस्कृतं वर्तते । संस्कृतभाषा आधुनिक विज्ञानस्य आधारशिला अस्ति। संस्कृत भाषायाः विज्ञानेन तकनीक्या सह गहन सम्बन्धः

वर्तते । गुरुत्वाकर्षणस्य सिद्धान्तः न्यूटनेन न अपितु सहस्र वर्षेभ्यः प्राक् महर्षिणा कणादेन प्रदत्तमासीत् । मनोविज्ञानं दर्शनं, गणितं योगः,



संस्कृत शिक्षण केन्द्रे विश्वसंस्कृत दिवस समारोहः अपि गतसप्ताहे समायोजितः आसीत्। तस्मिन् समारोहे विविधाः स्पर्धाः अपि सञ्जाताः। कार्यक्रमेस्मिन् प्रतिभागिभ्यः पुरस्कार वितरणमपि कृतम्।तत्रादौ दीपप्रज्ज्वलन पुरस्सरं शारदार्चनेन वैदिक मङ्गला चरणेन अतिथिभिः कार्यक्रमस्य शुभारम्भः विहितः । प्रास्ताविकोद्बोधने केन्द्रशिक्षकेण संस्कृतसस्य विषये अपि च संस्कृतस्य महत्त्वं प्रतिपादयन् प्रोक्तं यत् अधुना एतत् विश्व- संस्कृतदिनम् अथवा विश्वसंस्कृत दिवसः भारत सर्वकार यूनेस्को संस्था च मिलित्वा विश्वे सर्वत्र आयोज्येते । विश्वेस्मिन् प्रतिवर्षं श्रावणमासे सप्तदिनानि यावत् संस्कृतसप्ताहः आचर्यते । भारतस्य । विभिन्नेषु स्थानेषु संस्कृत प्रेमिणः संस्कृतदिनम् अथवा संस्कृतसप्ताहः अत्युत्साहेन आचरन्ति । पाठशालासु विश्वविद्यालयेषु संस्कृत प्रचारकर्तृसंस्थासु च संस्कृतसप्ताहस्य संस्कृतदिवसस्य च विशिष्टम् आयोजनं भवति नाटकानि नृत्यानि, प्रदर्शन्यः पदयात्राः संस्कृतगीतानां गायनम् इत्यादयः प्रवृत्तयः आभारते भवन्ति । भारते वर्षस्य 365 दिनानि अपि संस्कृतदिनानि भवेयुः - श्रावण पूर्णिमा संस्कृतोत्सवस्य दिनम्। ततः पूर्वतनानि त्रीणि दिनानि अनन्तरीयाणि त्रीणि दिनानि च मेलयित्वा संस्कृत सप्ताहः आचरणीयः इति केन्द्रसवर्कारिण उद्घोष्टम् अस्ति । यद्यपि भारते वर्षस्य ३६५ दिनानि अपि संस्कृत दिनानि भवेयुः तथापि अद्य सा स्थितिः नास्ति । आनेतव्या तादृशी परिस्थितिः इति उद्देशेन साङ्केतिक रूपेण संस्कृतदिनस्य सप्ताहस्य च आचरणं वयं कुर्मः । संस्कृतं समाजव्यापि भवेत् । लोक व्यवहारे आगच्छेत्। तदर्थं सर्वैरपि संस्कृतं स्वीयनित्य जीवने आचरणीयम् आयुर्वेदः, अर्थशास्त्र, प्रबन्धनं, भूगोल विज्ञानं, पदार्थ विज्ञानम् इत्यादिकं सर्वमपि ज्ञानविज्ञान मस्माकं ऋषयः वैदिक साहित्ये संस्कृत शास्त्रेषु च अनादिकालात् लोक कल्याणार्थं प्रदत्तवन्तः । तेषु संस्कृतग्रन्थेषु विद्यमानस्य ज्ञानभण्डारस्य परिज्ञानायं सर्वैरपि संस्कृताध्ययनं करणीयम् । संस्कृतं केवलं भाषा न अपितु सम्पूर्णमपि जीवनदर्शनम् अस्ति। डॉ० महेशपारिकःसंस्कृतस्य विषये स्वविचारान् प्रस्तुतवान् । तेनोक्तं यत् अस्माकं भारतीयपरम्परायां महर्षिः पतञ्जलिः शारीरिकस्वास्थ्यस्य कृते योगासनं, मानसिकस्वास्थ्यस्य कृते च ध्यानं प्राणायामञ्च शिक्षितवान्। डॉ०रतनभारद्वाजः अपि अस्मिन् कार्यक्रमे सारस्वतातिथित्वेन स्वीयोद्बोधने संस्कृतस्य दशा तथा दिशाविषये सर्वान् सम्बोधितवान्। शिक्षकदिवसमालक्ष्य तेन कथितं यत् शिक्षकः न केवलं पाठयति, अपितु प्रशिक्षकः अथवा प्रशिक्षणस्य कर्ता अपि भवति, सर्वेषु अर्थेषु शुभचिन्तकः, परिचर्याकर्ता च भवति। धर्मज्ञो धर्मकर्तश्च सदा धर्मपरायणः।

तत्वेभ्यः सर्वशास्त्रार्थदेशको गुरुरुच्यते ६ अस्यार्थः यत् ये धर्मज्ञाः धर्मानुसारं वर्तन्ते धार्मिकाः सर्वशास्त्रेभ्यः तत्त्वान् क्रमयन्ति ते गुरु उच्यन्ते।समग्रकार्यक्रमस्य सञ्चालनं केन्द्रछात्रेण कुलदीपशर्मणा कृतम्। रश्मिशर्मा स्वागतगीतं तथा सोनूप्रजापति संस्कृतगीतं प्रस्तुतवती। अस्मिन् समये महाविद्यालयस्य शिक्षकेषु जी०एल० शर्मा, रीटा झाझरिया, श्वेताभार्गवः, कल्पना, ममता, डॉ० अञ्जनाग्रवाल, खुशहाल महाशय, कृपाशंकरसहित समस्त महाविद्यालयपरिवारः तथा छात्राध्यापकाश्चोपस्थिताः अभवन्। शान्तिपाठेन अस्य कार्यक्रमस्य परिपूर्तिरभवत्। जयतु संस्कृतम्।।

# पाणिनिसंस्कृतविश्वविद्यालये विशिष्टव्याख्यानं सञ्जातम्

वार्तासंयोजकः डॉ.दिनेशःचौबे,

उज्जयिनीस्थमहर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य संस्कृतशिक्षणप्रशिक्षणज्ञानविज्ञान-संवर्धनकेन्द्रस्य तत्त्वावधाने संस्कृतसप्ताहसमारोहम् उपलक्ष्ये असप्ताहं यावत् केन्द्रेण नानाविदुषां विशिष्टव्याख्यानानि आयोज्यन्ते। अगस्तमासस्य 28-दिनाङ्कतः सितम्बरमासस्य 3-दिनाङ्कं यावत् अस्य कार्यक्रमस्य आयोजनं भवति। समारोहस्य उद्घाटनं 28 तमे दिनाङ्के अभूत्। कार्यक्रमस्य



पञ्चमदिवसे शास्त्रसंरक्षणोपायाः इति विषये विशिष्टव्याख्यानं सञ्जातम्।अस्मिन् कार्यक्रमे काशीहिन्दुविश्वविद्यालयस्य संस्कृतविद्याधर्मविज्ञानसङ्कायस्य आचार्यः प्रो. व्रजभूषणओझा महोदयः मुख्यवक्तृरूपेण उपस्थितः आसीत् । गुरुकुलमाध्यमेन अस्माकं शास्त्राणि रक्षितानि भवेयुः। व्यवहारिकरूपेण आयुर्वेदादिशास्त्राणि कथं प्रयुक्तानि भवेयुरिति चिन्तनीयमस्माभिः। न कण्ठस्थीकरणेन अपि तु व्यवहारेणैव शास्त्राणां संरक्षणं भवेत्। शास्त्ररक्षणाय इतोऽपि नानाविधान्युपायानि तेन उक्तानि, यानि युट्युब्-मध्ये उपलभ्यते, भवद्भिः तत्रैव श्रूयताम्। कार्यक्रमस्य आदौ वैदिकमङ्गलाचरणं तदनु विश्वविद्यालयस्य कुलगानं च अभवत्। व्याख्यानसत्राणां सत्राध्यक्षरूपेण विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. सि. जी. विजयकुमारमेननमहोदयः आसीत्। महोदयेन सभा सम्बोधिता संस्कृतसप्ताहसमरोहस्य शुभकामनाः च प्रदत्ता। कार्यक्रमसंयोजकः वेदव्याकरणविभागाध्यक्षः, डॉ. अखिलेशकुमारद्विवेदीमहोदयः वर्तते। कार्यक्रमस्य सञ्चालनं डॉ. दिनेशचौबेमहोदयेन, आभारप्रदर्शनं डॉ. शङ्करबेरामहोदयेन कृतम्। कल्याण मन्त्रेण सह सभा समाप्ता जाता।

# शिक्षकप्रशिक्षणमहाविद्यालये वैदिकयज्ञं विधाय नूतनसत्रस्यारम्भोऽनुष्ठितः

वार्तादात्री डॉ० सुनीताभार्गवः

वैदिककालात् सनातनसंस्कृतौ यज्ञस्य हवनस्य च परम्परा अस्ति, यस्याः माध्यमेन पर्यावरणस्य शुद्धिः मानवानां बौद्धिक-आध्यात्मिक-शारीरिक-विकासः च सम्भवति। अद्य एताः



सर्वाः वार्ताः मनसि कृत्वा नूतनाः अध्येतारः प्रवेशं कृतवन्तः। जयपुरस्थ संजयशिक्षकप्रशिक्षणमहाविद्यालये शिक्षाशास्त्री तथा बी०एड० छात्राणां कृते यज्ञकार्यक्रमस्य आयोजनं कृतम् यस्मिन् सर्वे छात्राः शिक्षकाः च यथासम्भवं भागं गृहीतवन्तः।कार्यक्रमस्य आरम्भः भगवान् गणेशः, देवी लक्ष्मीः, देवी सरस्वती च आराधनेन अभवत् । तदनन्तरं सर्वे नवप्रवेशिताः छात्राः शिवस्य संकल्पं कामयन्तः ललाटे तिलकं, हस्ते रक्षासूत्रं च बद्ध्वा अध्ययनं कर्तुं प्रेरिताः अभवन् । तदनन्तरं महाविद्यालयस्य प्राचार्या डॉ. सुनीता भार्गवेन एपेक्स इन्टरनेशनलस्कूल इत्यस्य वर्तमाननिदेशिका डॉ०सीतनजूनीवालः च वैदिक आचार्यवर्याणां सङ्गमे यज्ञस्य कार्यक्रमः आरब्धवत्यौ। अस्मिन् अवसरे महाविद्यालयस्य प्राचार्यः सर्वान् छात्रान् प्रेरितवान् यत् यज्ञस्य माध्यमेन अस्माकं वातावरणं शुद्धं भवति, मनः आत्मा च शुद्धाः भवन्ति तथा च व्यक्तेः बौद्धिकः आध्यात्मिकः च विकासः भवति, अतः अस्माभिः सर्वैः दैनन्दिनजीवने यज्ञः कर्तव्यः। देशभक्ति-आध्यात्म-भावनाया ओतप्रोताः सर्वे छात्राः स्वजीवनं सुदृढं कर्तुं प्रतिज्ञां कृतवन्तः। अस्मिन् अवसरे मरुधर बालिकाविद्यालयस्य प्राचार्या डॉ. यशवन्ती गौर तथा संजय शिक्षकस्य सर्वे प्राध्यापकाः, प्राध्यापकाः, छात्राध्यापकाः, छात्रशिक्षकाः च प्रशिक्षण महाविद्यालय, सह नवप्रविष्टाः छात्राः चोपस्थिताः आसन् तथा च कार्यक्रमस्य अन्ते प्रसादः सर्वेभ्यः वितरितः।

# संस्कृतसप्ताहमहोत्सवप्रतिवेदनम्

नवदेहलीस्थ-जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृतप्राच्यविद्याध्ययनसंस्थानेन ष्संस्कृतशास्त्रपरम्परायां ललितकलाःष इति विषयमधिकृत्य सितम्बरमासस्य ४,५,६ दिनाङ्केषु समायोजितः



संस्कृतसप्ताहमहोत्सवः-२०२३ सफलतापूर्वकं सम्पन्नः। सितम्बरमासस्य ४ दिनाङ्के प्रवृत्ते उद्घाटन-समारोहे संस्कृतभारत्याः अखिलभारतीयसङ्घटनमन्त्रिणां श्रीदिनेशकामतवर्याणां इंदिरागांधीराष्ट्रियकलाकेन्द्रस्य च न्यासिनां प्रो. भरतगुप्तवर्याणां पावनसान्निध्यम् अभवत्। अन्यदिनेषु च राष्ट्रियनाट्यविद्यालयस्थकलाविदः अजयकुमारस्य, इंदिरागांधीराष्ट्रियकलाकेन्द्रस्य प्रो. अद्वैतवादिनी कौलस्य, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य मीमांसाविदः प्रो. आरावमुदनः, दिल्लीविश्वविद्यालयस्य ललितकलासङ्कायाध्यक्षचरायाः प्रो. दीप्ति ओमचेरी भल्लायाश्च मार्गदर्शनमभवत्। एतस्मिन्नवसरे संस्थानीयच्छात्रैः विविधसांस्कृतिककार्यक्रमाः प्रदर्श्य अभ्यागतानां



मनो रञ्जितः। अस्मिन्नेवावसरे छात्राणां कौशलविकासाय भाषणस्पर्धा, आशुभाषणस्पर्धा, संस्कृतगीतस्पर्धाश्चापि आयोजिताः। महोत्सवस्यान्ते संस्थानस्य संकायाध्यक्षेण प्रो. सुधीरकुमारेण सर्वेषां कृते धन्यवादज्ञापनं विधत्तम्। सम्पूर्णमहोत्सवस्यास्य संयोजनं डा. टी. महेन्द्रवर्यः अकरोदत्रास्य सहयोगं डा. ज्योतिः डा. विजेन्द्रसिंहश्चाकुरुताम्। महोत्सवोऽयं संस्थानस्य समेषां छात्राणामध्यापकानाञ्च महत्प्रयासैः साफल्यमभजत्।

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।